सागरिका

संस्कृतत्रैमासिकी

षट्त्रिंशवर्षे अङ्कः प्रथमः

संस्कृतगौरवविशेषाङ्कः

३६/१

विक्रमसंवत् २०५८

सागरिका समितिः

संस्कृतविभागः

डॉ.हरीसिंहगौरविश्वविद्यालयः, सागरम्

सागरिका

(संस्कृतत्रैमासिकी)

❖

विक्रमसंवत् २०५८

❖

षट्त्रिंशवर्षे अङ्कः प्रथमः

३६/१

संस्कृतगौरवविशेषाङ्कः

❖

संस्थापकः प्रधानसम्पादकश्च

रामजीउपाध्यायः

❖

सम्पादकः

राधावल्लभत्रिपाठी

❖

सागरिकासमितिः

संस्कृतविभागः

डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम् (म.प्र.)

देयम्

प्रत्यङ्कम्	६.००	रूप्यकाणि
वार्षिकम्	३०.००	रूप्यकाणि
आजीवनग्राहकस्य	५००.००	रूप्यकाणि
अस्याङ्कस्य पृथङ्मूल्यम्	२०.००	रूप्यकाणि

अङ्कप्रकाशः **प्रतिवर्षम् -- आषाढाश्विन --पौष - चैत्रमासेषु**

(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः

डॉ. राधावल्लभः त्रिपाठी,
संस्कृतविभागाध्यक्षः
डॉ.हरीसिंहगौरविश्वविद्यालयः
सागरम् ४६० ००३

अक्षरयोजनम्

नरेश सैनी (संस्कृतविभागे)
डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम्

अनुक्रमः

सम्पादकीयम्

आधुनिकसंस्कृतसाहित्यश्रीः : परिचयखण्डः

१- श्रीमद्रामज्युपाध्यायचरितम्-- राधावल्लभः

२- श्रीमद्रामज्युपाध्यायविरचिताः ग्रन्थाः

३- श्रीमद्रामज्युपाध्यायविरचिताः लेखाः

सङ्कलयिता- डॉ0 धर्मेन्द्रकुमारः

४- श्रीमद्रामज्युपाध्यायसाहित्यसमीक्षणम्

डॉ0 रमाकान्तपाण्डेयः

संस्कृतगौरवम्

१- महात्मनो बुद्धस्य दर्शनम् आधुनिकं विश्वं च

डॉ0 शङ्करदयालशर्मा

२- संस्कृतस्य सार्वभौमत्वम्

डॉ0 मुरलीमनोहरजोशी

३- संस्कृतं, विज्ञानं, वर्तमानविश्वं च

डॉ0 मुरलीमनोहरजोशी

सम्पादकीयम्

सागरिकायाः संस्कृतगौरवविशेषाङ्केऽस्मिन् प्रस्तूयते प्रथमं संस्कृतसेवा-परायणानां संस्कृतिनिष्ठानां तपःपूतानां श्रीमतां रामज्युपाध्यानां परिचयः। परिचयोऽयं विगताङ्कस्य आधुनिकसंस्कृतसाहित्यविशेषाङ्कस्य परिशेषभूत आधुनिकसंस्कृत-साहित्यश्रियं समग्रयति। अनन्तरं चात्र प्रकाश्यन्ते त्रीणि व्याख्यानानि। प्रथमं व्याख्यानं भारतदेशस्य पूर्वराष्ट्रपतीनां दिवङ्गतानां श्रीमतां शङ्करदयालशर्ममहोदयानाम् वर्तते। एतद् व्याख्यानं तदानीन्तनैर्महामहिमराष्ट्रपतिभिः केन्द्रियोच्चतिब्बतीशिक्षासंस्थानस्य दीक्षान्तमहोत्सवे प्रदत्तम्। संस्कृतं प्रति भारतीयां परम्परां प्रति च तेषां महोदयानाम् अकुण्ठिता आस्था सुविदिता वर्तते। तथैव विज्ञायत एव तेषां बहुश्रुतत्वम्, अवितथा चाधीतिः। प्रस्तुते व्याख्याने भगवतो बुद्धस्य सन्देशं, तस्य सन्देशस्य साम्प्रतिकीमुपादेयतां चाधिकृत्य शर्ममहोदयैः सम्यक् विमर्शो व्यधायि। अतः परं व्याख्यानद्वयमिह भारतशासनस्य मानवसंसाधनविकासस्य विज्ञानप्रौद्योगिक्योः समुद्रविकासस्य च मन्त्रिणां श्रीमतां प्राध्यापकवर्याणां मुरलीमनोहरजोशीमहोदयानां वर्तते। तत्र प्रथमं व्याख्यानं नाम एषमो मई-मासस्य एकविंशतितमे दिवसे एतैः महोदयैः थाईलैण्डदेशे बैङ्काकनगरे शिल्पकार (सिल्पाकोन)- विश्वविद्यालयस्य संस्कृताध्ययनकेन्द्रेण "दक्षिणपूर्वेशियादेशेषु संस्कृतम्-- संस्कृतीनां समन्वयस्यो-पादानम्-" इति विषयमवलम्ब्य समायोजितस्य अन्ताराष्ट्रियसम्मेलनस्य उद्घाटनसत्रे प्रदत्तम् आधारभाषणम्। अस्मिन् व्याख्याने संस्कृतस्य वैश्विकं रूपं भारतीयविश्वबोधस्य जीवनदृष्टेश्च इदानीन्तने काले प्रसङ्गोपात्तत्वं प्रतिपादिते। द्वितीयं व्याख्यानं जोशीमहोदयैरेव देहल्याम् एषमो एप्रिलमासस्य पञ्चमतारिकायां विश्वसंस्कृत-सम्मेलनस्य उद्घाटनावसरे प्रस्तुतं अध्यक्षभाषणं विद्यते। अस्मिन् भाषणे सम्प्रति भौतिकविज्ञानक्षेत्रे जायमानेन नवीनचिन्तनेन कथमस्माकमनूचानैः साक्षात्कृतानि सृष्टिरहस्यानि सङ्गतिं प्रकटयन्ति, कथं चाधुनिकं विज्ञानं संस्कृतशास्त्रेषु निहितैः विमर्शैः समधिकतरं अग्रसरं विधातुं शक्यत इति सप्रमाणं तथ्यान्वेषणपुरस्सरं प्रत्यपादि। आधुनिकसंस्कृतसाहित्यस्यापि समृद्धिः संस्कृतस्य साम्प्रतिकी रचनाशीलता चात्र साधु प्रकटीकृता।

शङ्करदयालशर्म-मुरलीमनोहरजोशीभ्यां एतानि भाषणानि संस्कृतेन एव प्रस्तुतानि। उभयोरपि अनयोर्महानुभावयोः संस्कृतभाषायाः संस्कृतसाहित्यस्य ज्ञानं समुज्ज्वलं चाध्ययनं तत्र परिलक्ष्यते। एतद्व्याख्यानत्रयं साम्प्रतिके काले संस्कृत-भाषाया अवदानं, शास्त्रपरम्पराणां भारतीयतत्त्वचिन्तनस्य च महामहिमशालित्वं यथायथं निरूपयतीति संस्कृतगौरवविशेषाङ्केऽस्मिन् श्रीमद्रामज्युपाध्यायाभिनन्दनेन सह सगौरवमेतत् प्रकाशयामः। स्वव्याख्यानप्रकाशनाय अनुमतिं दत्तवते श्रीमते मुरली-मनोहरजोशीमहोदयाय तिब्बतीशिक्षासंस्थानाय च कृतज्ञतां प्रकटयाम इति दिक् (रा०)

परिचयखण्डः

श्रीमद्रामज्युपाध्यायचरितम्

राधावल्लभः

श्रीरामज्युपाध्यायः १९२०ई० वर्षे उत्तरप्रदेशस्य बलियाजनपदान्तर्वर्तिनि मलैजीग्रामे जनिमलभत। अस्य पिता श्रीमान् महावीरोपाध्यायः स्वयमेव संस्कारसम्पन्नः संस्कृतसाहित्यानुरागी चासीत्। बलियाजनपदं विद्यते परशुरामचतुर्वेदि- हजारीप्रसादद्विवेदिसदृशानां विदुषां तथैव भारतीयस्वातन्त्र्यसङ्ग्रामे विहितप्राणाहुतीनां वीराणां जन्मभूमिः। अस्या एव भूमेरधिगता उपाध्यायवर्येण संस्कृतं प्रति संस्कृतिं प्रति चाकुण्ठनिष्ठाया राष्ट्रप्रेम्णश्च संस्काराः। स्वजन्मग्रामे अनेन प्राथमिकी शिक्षा समधिगता। अनन्तरम् उच्चाध्ययनाय पित्रा प्रयागं प्रेषितः। तत्रायं बाबूरामसक्सेना- क्षेत्रेशचन्द्रचट्टोपाध्याय- लक्ष्मणशास्त्रितैलङ्ग- प्रसन्नकुमाराचार्य- सदृशानामाचार्याणां सम्पर्कमवाप्य तेजस्विनं स्वाधीतं चकार। इलाहाबादविश्वविद्यालयात् संस्कृतविषयमादाय स्नातकोत्तरोपाधिं प्राप्य श्रीमतां बाबूरामसक्सेनामहोदयानां निर्देशे संस्कृतप्राकृतमहाकाव्य-योस्तौलनिकमध्ययनमाश्रित्यायमुसन्धानं समपादयत्। तत्रैव च स्थित्वा भारतीयसंस्कृतिविषयकं प्रथमं पुस्तकमपि हिन्दीभाषया प्रणिनाय।

सागरविश्वविद्यलयेऽयं महाभागः प्रथितविधिविशेषज्ञस्य डॉ० हरीसिंहगौरस्य, विश्वविश्रुतेतिहासविदः रामप्रसादत्रिपाठिनः, विद्वत्कवेः दण्डनीतौ कौटिल्यतुल्यस्य डॉ० द्वारकाप्रसादमिश्रस्य राजनीतिशास्त्र-प्राध्यापकस्य महादेवप्रसादशर्मणः दर्शनशास्त्रप्राध्यापकस्य चन्द्रशेखरा-वस्थिनः, प्रकाण्डपण्डितस्य बच्चूलालावस्थिनः इतिहासप्राध्यापकस्य डॉ० हीरालालगुप्तस्य तथैवान्येषां विविधविद्यावदातानां विदुषां सम्पर्कमाप, स्वकीयस्य ज्ञानक्षितिजस्य विस्तारं व्यदधात्, विविधग्रन्थरचनया च

पुपोष सुरसरस्वतीसाहित्यभाण्डागारम्।

व्यक्तित्वम्-

उपाध्यायमहोदयः सदैव शुभ्रखादीवस्त्रविभूषितः उन्नतभालः दीर्घकायः तेजस्वी भारतीयतायाः साकारविग्रहः प्रतीयते। गम्भीराणां समस्यानां निराकरणमयं सस्मितवदनो विदधाति। अस्य विनोदप्रियता सदाऽस्य शिष्यैः सहयोगिभिरनुभूयते। अस्य परिहासकथनानि नर्मवचांसि च भवन्ति हृदयहारीणि। स्पष्टवादिता आदर्शप्रवणता दृढता चास्य गुणाः। प्राध्यापकजीवने संस्कृतच्छात्रान् न केवलं विद्यादानेन अपितु वित्तसाहाय्येन भोजनादिव्यवस्थया च पितेवायं संरक्षति स्म।

संस्कृतसेवाकार्याणि-

उपाध्यायमहाभागः १९४७ई०वर्षे जुलाईमासस्य सप्तमदिवसे सागरविश्वविद्यालयस्य संस्कृतविभागे व्याख्यातृपदे कार्यभारमग्रहणात्। १९५७ई० वर्षे जुलाईमासस्य एकादशदिनाङ्केऽयं प्रवाचकपदं, १९६३ई०वर्षे सितम्बरमासस्य प्रथमदिने चाचार्यपदं प्राप। अस्मिन्नेव विभागे प्रायः त्रिंशद्वर्षाणि संस्कृतविभागाध्यक्षपदमप्यलङ्कुर्वन्नयं अध्यापने स्वाध्याये च दत्तचित्तः अनवरतं संस्कृतं सिषेवे। सागरे निवसताऽनेन प्रणीताः पञ्चाशत्प्रायाः ग्रन्थाः परःशतं च लेखाः, संस्थापिताः बहुविधाः संस्कृतसंस्कृतिकार्यपराः संस्थाश्च। अनेन संस्थापिताः काश्चन संस्था अत्र परिगण्यन्ते। तथाहि-

सागरिकासमितिः- इयं समितिः सागरिकापत्रिकायाः प्रकाशनाय उपाध्यावर्येण स्थापिता। स चास्याः १९६३ई० वर्षात् १९८०ई० वर्षं यावत् संस्थापकाध्यक्षोऽभवत्। विश्वविद्यालयस्य संस्कृतविभागे प्राध्यापिका श्रीमती वनमालाभवालकरमहोदया अस्या समितेः कोशाध्यक्षपदं, प्राध्यापकवर्यो विश्वनाथभट्टाचार्यश्च सचिवपदमलङ्चक्रतुः। समितिरियं सम्प्रत्यपि सक्रिया वर्तते।

संस्कृतपरिषत्- संस्कृतसाहित्यविषयकग्रन्थानां प्रकाशनाय सांस्कृतिककार्यक्रमाणामायोजनाय च परिषदियं संस्थापिता। पञ्चाशत्प्रायाः ग्रन्था अनया परिषदा प्रकाशिताः। परिषदियं सम्प्रत्यपि

तथैव प्रचलति।

गान्धीपरिषत्- महात्मनो गान्धिनः जीवनदर्शनस्य प्रचाराय संस्थापिता परिषदियमुपाध्यायवर्यस्य गान्धीवादे सुदृढामास्थामभिव्यनक्ति स्म। इतिहासविभाग आचार्य डॉ० हीरालालगुप्तोऽस्याः परिषदोऽध्यक्ष आसीत्। परिषदः पुस्तकालय आसीत्। गान्धीसाहित्यप्रथमा, गान्धीसाहित्यमध्यमा, गान्धीसाहित्योपाध्याय इत्यादयः परीक्षाः परिषदा सञ्चाल्यन्ते स्म। एताः परीक्षा उत्तीर्य छात्रा गान्धीदर्शने नदीष्णा बभूवुः। परिषदियं प्रायः १९६०ई०तः १९७०ई० वर्षं यावदेव सक्रिया अभूत्, सम्प्रति न प्रचलति।

ढानासंस्कृतविद्यालयः- संस्कृतविद्यालयोऽयं सागरनगरात् समीपवर्तिनि ढानाग्रामे उपाध्यायवर्येण स्थापितः प्राचीनगुरुकुलस्य वैशिष्ट्यमाविश्चकार। ग्रामजीवनस्य पावनत्वमत्र विद्योतते स्म। विद्यालयच्छात्रा भारतीयपारम्परिकगुरुकुलपद्धत्या अधीयाना तद्गतमौदात्त्यं गौरवं च भावयेयुरिति स्वप्नोऽत्र उपाध्यायवर्यस्य चरितार्थतां नीतः। दुर्दैववशात् विद्यालयोऽयं चिरस्थायी नाभूत्। ढानाग्रामे जीर्णतामुपगच्छत् शून्यं चास्य भवनं उपाध्यावर्याणां पुरुषार्थकथामद्यापि निःशब्दं प्रकटीकुरुते।

सम्पादनम्

सागरिकापत्रिका रामज्युपाध्यायमहाभागानां संस्कृतपत्रकारितायां महनीयं योगदानम्। इयं शोधपत्रिका सम्प्रति षट्त्रिंशद्वर्षं प्रचलति, समुन्मीलयति च संस्कृतविद्यायाः क्षेत्रे समुज्ज्वला अभिनवाश्चानुसन्धानदिशः प्रकटयति च भारतीयप्रज्ञाया उदात्तं रूपम्। अस्या लेखकेषु महामहोपाध्यायवासुदेवविष्णुमिराशी- विद्यानिवासमिश्र-पण्डितबच्चूलालावस्थि-राममूर्तित्रिपाठि-चिन्ताहरणचक्रवर्ती-पुल्लेलश्रीराम चन्द्रुडु-रेवाप्रसादद्विवेदि-अशोकचटर्जीशास्त्रि- प्रभृतयः प्रख्याता विद्वांसः सन्ति।

आधुनिकसंस्कृतसाहित्यसङ्गोष्ठी-

दशदिवसीया अखिलभारतीया सङ्गोष्ठीयं श्रीमतो रामज्युपाध्यायस्य सञ्चालकत्वे १९६५तमे ख्रिस्ताब्दे मई मासे आयोजिता। अत्र गोविन्दत्रिगुणायत- चिन्ताहरणचक्रवर्ति- रेवाप्रसाद-

द्विवेदि- राममूर्तिशर्म- प्रभृतयः षष्टिप्रायाः विद्वांसः आधुनिकसंस्कृत-साहित्यमधिकृत्य विविधविषयसंवलितं विमर्शं विदधिरे। सङ्गोष्ठ्यां प्रस्तुतानां लेखानां परस्तात् पुस्तकाकारं सङ्ग्रहः श्रीमता उपाध्यायेन सम्पाद्य प्रकाशितः।

शिष्यपरम्परा -

उपाध्यावर्यस्य शिष्येषु बहवः तेषु तेषु भारतीयविश्वविद्यालयेषु महाविद्यालयेषु वा संस्कृतप्राध्यापकपदानि समलङ्कुर्वाणा अस्य गुरुपरम्परां प्रख्यापयन्ति। तेषु स्वर्गीयो हरीन्द्रभूषणजैनः विक्रमविश्वविद्यालयस्य संस्कृतविभागे प्रवाचकपदात् सेवानिवृत्तः प्रातःस्मरणीयतां भजते। डॉ० हीरालालशुक्लः सम्प्रति भोपालनगरस्थे बर्कतुल्लाहविश्वविद्यालये तुलनात्मकभाषासंस्कृतिविभागे आचार्याध्यक्ष-पदाधिष्ठितः। डॉ० रामगोपालमिश्रः दिल्लीविश्वविश्चालये प्राध्यापकः। पण्डितप्रेमनारायणद्विवेदिनः कर्तृत्वं संस्कृतरचनावैशारद्यं च सर्वथा काव्यविदां समाजे सुविदितमेव। डॉ० शिवदर्शनतिवारी दमोहनगरस्थे स्नातकोत्तरमहाविद्यालये आचार्याध्यक्षः, राधावल्लभ- कुसुमभूरिया- आशा -सर्वटे इत्येते सागरविश्वविद्यालयस्य संस्कृतविभागे चाध्यापयन्ति। एवमेवास्य शिष्येषु हिमाचलप्रदेशस्थकेन्द्रियसंस्कृतविद्यापीठे व्याख्याता रामलखनपाण्डेयः, पटियालास्थे पञ्जाबीविश्वविद्यालये संस्कृतविभागे प्रवाचकः इन्द्रमोहनसिंहः, भोपालनगरस्थे बर्कतुल्लाहविश्वविद्यालये तुलनात्मकभाषासंस्कृतिविभागे प्रवाचकपदाधिष्ठितः डॉ० क्षेत्रवासीपण्डा, फैजाबादस्थे साकेत- महाविद्यालये प्राध्यापकः रविनन्दनस्त्रिपाठी, गुनानगरस्थे महाविद्यालये संस्कृतप्राध्यापकः परमानन्दमिश्रः, दमोहनगर-स्थो भागचन्दजैनो भागेन्दुः अन्ये च परःशतं पण्डिताः शिष्यरम्परामस्य विस्तारयन्ति। जैनविद्यायाम् अप्रतिमो विद्वन्मनीषी साहित्याचार्यः स्वर्गीयः पण्डितपन्नालालजैनस्तथैव सागरविश्वविद्यालस्य संस्कृतविभागे प्रवाचकपदमलङ्कृत्य सेवानिवृत्ता भवालकरोपाह्वा श्रीमती वनमालापि चास्य निर्देशे पी०एच्०डीत्युपाधयें शोधकार्यं सम्पादितवन्तौ।

शङ्करलालस्वर्णकारः, गोहदरसिंहकुरवेती, रामरतनपाण्डेयः अन्ये च केचनास्य शिष्याः प्रशासनिकसेवायामन्येषु विभागेषु कार्यरता अपि अस्मादधिगतान् सत्संस्कारान् पुष्णन्ति।

अनुसन्धाने अवदानम्

आधुनिकसंस्कृतसाहित्यमधिकृत्य महान् अध्यवसायः श्रीमता उपाध्यायेन प्रकटीकृतः। वस्तुतो निखिलेऽपि भारते शोधदृशा समकालिकसंस्कृतसाहित्यपरीक्षणेऽयं प्रवर्तकं कार्यं सम्पादयामास। भागद्वये प्रकाशित आधुनिकसंस्कृतनाटक इत्यभिधः ग्रन्थः परःसहस्रं पृष्ठेषु आ षोडशशतकाद् आ विंशशतकाच्च विरचितानां सहस्राधिकरूपकाणां परिचयं ददानोऽस्य वैदुषीमनुसन्धाननैपुणीं च प्रकटीकरोति।

नाट्यशास्त्रसिद्धान्तानामनुशीलनेऽनेन नवीना दिश उन्मीलिताः। धनञ्जयादिभिराचार्यैर्विहितस्य भरतातिक्रमस्य परीक्षणं विधाय नवीना उद्भावना अपि प्रदर्शिताः। तथाहि- पिशलप्रभृतिपाश्चात्त्यविदुषां मतानि प्रत्याख्याय छायानाटकस्य यथायथं स्वरूपमनेनेदम्प्रथमतयोन्मीलितम्। भारतीयसंस्कृतेरध्येतृषु व्याख्यातृषु चायं सर्वथा अग्रगण्यः।

संस्कृतसाहित्यसागरस्य गम्भीरं मन्थनं विधायानेन संस्कृतेरनर्घानि रत्नानि आविष्कृतानि, साक्षात्कृताश्च च प्राचीनानामुदात्तजीवनादर्शाः।

उपाध्यायवर्यः पुरातनादर्शानां, पुरातनगुरुपरम्पराया चारित्रिकदृढतायाश्च मानदण्ड एवेति न संशीतिः।

----ooo----

श्रीरामज्युपाध्यायानां कृतयः

ग्रन्थाः

१. भारतस्य सांस्कृतिकनिधि : (पुरस्कृतः)
२. भारत की संस्कृतिसाधना
३. संस्कृत साहित्य का आलोचनात्मक इतिहास - भागद्वये
४. संस्कृतसूक्तिरत्नाकरः
५. भारत की सामाजिक संस्कृति
६. द्वा सुपर्णा - संस्कृत उपन्यासः
७. संस्कृत के महाकवि और काव्य (सहसम्पादनम्)
८. धम्मपद (सं.तथा अनु.)
९. संस्कृत व्याकरण और निबन्ध
१०. संस्कृत निबन्धावली (सम्पादनम्)
११. भारतीय संस्कृति का उत्थान (हिन्द्याम्)
१२. मनुस्मृतिनवनीतम् (सं.)
१३. संस्कृतमहाकाव्यादर्शः (सं.)
१४. भासनाटकचक्रम् (सं.)

१५. महाभारतीयसंस्कृतिकोशः (सं.)
१६. नाट्यशास्त्रीयानुसन्धानम्
१७. दशरूपकतत्त्वदर्शनम्
१८. नाट्यशास्त्रीय-प्रयोगविज्ञानम्
१९. नाट्यशास्त्रीय पारिभाषिकशब्दानुक्रमणिका (सं.)
२०. मध्यकालिकः संस्कृतनाटकालोकः
२१. प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका (हिन्द्याम्)
२२. आधुनिकसंस्कृतनाटक (पुरस्कृतः)
२३. Sanskrit and Prakrit Mahākāvyas
२४. सत्यहरिश्चन्द्रादयम्-संस्कृतमाख्यानम्
२५. भारत की प्राचीन संस्कृति (पुरस्कृतः)
२६. महाकविः कालिदास (पुरस्कृतः)
२७. पूर्वपथ (नाटकम्-हिन्द्याम्)
२८. विशशताब्दिकः संस्कृतनाटकालोकः
२९. सीताचरितम् (नाटकम्)
३०. केकेयीचरितम् (नाटकम्)
३१. भारतीयसंस्कृतिसौरभम्
३२. विश्वमानवसंस्कृतिः

श्रीरामज्युपाध्यायानां सागरिकायां प्रकाशिताः लेखाः/ग्रन्थाः

सङ्कलयिता : डॉ.धर्मेन्द्रकुमारः

	लेखः/ग्रन्थः	अंकाः
१.	संस्कृतस्यावनतिः पुनरुत्थानञ्च	१.१
२.	राजेन्द्रप्रसादचरितम्	१.२
३.	तस्माद् मुध्यस्व भारत	१.२
४.	आधुनिकशिक्षानीतिः	२.१
५.	भवभूतिर्विशिष्यते	२.४
६.	राजतरंगिणी	३.३
७.	संस्कृतशिक्षणस्य कतिपय-समस्याः	४.२
८.	नथमल-ब्रह्मचारिण आगमग्रन्थो मुखभाषा च	४.३
९.	वैदिककालीनं शिल्पम्	५.१
१०.	ऋग्वैदिकचरित्रनिर्माणम्	५.१

११.	भारतीयसंस्कृतिदर्शनम्	५.२/५.४
१२.	रामनाथः तस्य आर्यालहरी विलापलहरी च	६.१
१३.	संस्कृतं भारतीयराष्ट्रियता च	६.२
१४.	अनूपसिंहस्तस्य संस्कृतसंवर्धनं च	६.३
१५.	जयद्विजयछन्दस्याधिकरणम्	७.२
१६.	रामनारायणतर्करत्नस्य दक्षयज्ञमहाकाव्यम्	७.३
१७.	कुमारसम्भवस्योपजीव्यानुसन्धानम्	७.४
१८.	मेघदूतानुशीलनम्	८.४
१९.	संस्कृतिविशेषाङ्कः (ग्रन्थः)	९/१-४

संस्कारः
आश्रमव्यवस्था
सामाजिकसंस्थानम्
उपभोग्यानि
व्यवसायाः
मनोविनोदाः
राजतन्त्रम्
दार्शनिकप्रवृत्तयः
धार्मिकप्रवृत्तयः
शिल्पसाधना
विज्ञानम्
काव्यसाधना
वैदेशिको ऽनुबन्धः
उपसंहारः

२०.	कुमारसम्भवरघुवंशयोः पौर्वापर्यम्	१०.१
२१.	स्वप्नवासवत्तावेणीसंहारयोरङ्गिरसविमर्शः	१०.२
२२.	सागरविश्वविद्यालये संस्कृतसेवा -	१०.४
२३.	रूपके दृश्यसूच्यानुसन्धानम्	११.१
२४.	संस्कृतरूपकेषु एकोक्तिः	११.१

२५.	छलितरामस्य कृत्यारावणस्य च नाम्नी	११.२
२६.	अप्राप्त संस्कृत-रूपकाणि	११.३
२७.	महाकविः कालिदासः	१२.१
२८.	भासनाट्यस्य कतिपयवैशिष्ट्यानि	१२.४
२९.	अस्मदीयम्	१३.१
३०.	भरतातिक्रमः	१३.२
३१.	प्रस्तावना-मीमांसा	१३.३
३२.	वसुमतिपरिणयः	१४.१
३३.	अर्थप्रकृतिविमर्शः	१५.३
३४.	विंशशताब्दिकं संस्कृतनाटकम् (ग्रन्थः)	१६.१
३५.	प्राप्तिसम्भवविमर्शः	१६.४
३६.	पुण्यपन्तने प्राच्यपरिषद्यभिभाषणम्	१६.४
३७.	दशरूपक-मीमांसा	१७.१,२
३८.	कालिदासस्यावासभूमिः	१३.३
३९.	मध्यकालिकं संस्कृतनाटकम् (ग्रन्थः)	१७.४
४०.	नाट्यशास्त्रीय-पारिभाषिक-शब्दानुक्रमणिका	१९.२
४१.	अङ्केऽपि सूच्यम्	१९.२
४२.	प्रयोगविज्ञानम् (ग्रन्थः)	१९.३
४३.	अभिज्ञानशाकुन्तलस्य नाट्यशास्त्रीयानुशीलनम्	२०.१
४४.	भाणेऽभिनयो लास्याङ्गानि च	२०.१
४५.	नायकविमर्शः	२०.२
४६.	दुष्यन्तो धीरोदात्तो धीरललितो वा	२०.२
४७.	अङ्गनायकाः	२०.२
४८.	नृत्यं नाट्यञ्च	२०.२
४९.	महाभारतीय-संस्कृतिकोशः	२०.४
५०.	महाभारते छायातत्त्वम्	२१.१
५१.	महाभारते गोप्रतिष्ठा	२१.२
५२.	नाट्यशास्त्रे छायातत्त्वम्	२१.३

५३.	नेपथ्ये आकाशे वा ?	२१.३
५४.	सन्धिः अवस्था, अर्थप्रकृतिश्च	२१.३
५५.	प्रवेशक-विष्कम्भकयोर्निधानम्	२१.३
५६.	सन्ध्यन्तर-रहस्यम्	२१.४
५७.	नाटके कथांशानां पूर्वसूचनावश्यकी	२१.४
५८.	रङ्गशीर्षं तस्योपयोगश्च	२१.४
५९.	अभिज्ञान-शाकुन्तले प्रवेशकानां विन्यासः	२१.४
६०.	नाटके वर्णनसन्निवेशः	२१.४
६१.	प्रकरी वर्णनादिर्नावस्ति	२१.४
६२.	पूर्वरंगावधारणम्	२२.२
६३.	प्रस्तावना	२२.२
६४.	नान्दी	२२.२
६५.	नाटकेषु अंकच्छेद-विधिः	२२.२
६६.	प्रवेशकोद्धरणम्	२२.२
६७.	व्यभिचारि वृत्तम्	२२.२
६८.	नायकानामुत्तमाधमत्वम्	२२.२
६९.	अंकस्य मध्येऽपि प्रवेशकः	२२.२
७०.	नाट्यशास्त्रीयानुसन्धानम्	२२.३
७१.	नायकनियोगानुशीलनम्	२२.४
७२.	नाट्यशास्त्रीयानुसन्धानम् नाटकेषु हास्ययोगः नायकानामन्तर्धिः कथान्तरसन्निवेशः नाटकेष्वज्ञातनायकत्वम्	२३.१
७३.	नाट्यशास्त्रीयानुसन्धानम्	२३.२
७४.	नाट्यशास्त्रीयानुसन्धानम्	२३.३
७५.	नाट्यशास्त्रीयानुसन्धानम्	२३.४
७६.	नाट्यशास्त्रीयानुसन्धानम्	२४.१

७७.	सागरे संस्कृत-साहित्यसंवर्धनम्	२४.४
७८.	सत्यहरिश्चन्द्रोदयम्	२५.२
७९.	कथावस्तुसंरचना	२५.२
८०.	प्रयागजनपदे वाल्मीकितपोवनम्	२५.३
८१.	अङ्कावतारः अङ्कमुखं प्रवेशकश्च	२५.४
८२.	काव्ये रसवसतिः	२७.३
८३.	गार्हस्थ्यविमर्शः कर्मयोगश्च	२८.१
८४.	वनाश्रमः, संन्यासाश्रमः	२८.२-३
८५.	धर्मसमाजदर्शनम् (ग्रन्थः)	२९.३-४
८६.	राजनीतिकप्रवृत्तयः	३०.३-४
८७.	भारतीयसंस्कृतिसौरभम्	३१.२
८८.	विश्वमानवसंस्कृतिः (ग्रन्थः)	३३.१-२
	विषय-प्रवेशः	
	आस्थाः	
	जीवन-दर्शनम्	
	आश्रम-चतुष्कम्	
	वर्णचतुष्कम्	
	सामाजिक-स्थितिः	
	स्त्री-निबन्धनम्	
	धर्मोपपत्तयः	
	मनुस्मृति-रहस्यम्	
	परिशिष्टम्	
	पारिभाषिक-शब्दनिचयः	
८९.	वृक्षः	३२.४

आङ्ग्लभाषायां प्रकाशितौ शोधलेखौ

1. Kārya Among the Elements of Plot - Annals of Bhandarkar Oriental Research Institute Diamond Jubilee Vol. 1977-78.
2. Some Problems of Sanskrit Dramaturgy : Surbhārati, Journal of Sanskrit Parishad, Osmania University, Hyderabad, Vol. I.

श्रीमतां रामज्युपाध्यायानां निर्देशे सम्पन्नाः शोधप्रबन्धाः

शोधकर्ता	विषयः	वर्षः
१. हरीन्द्रभूषण जैन	जैन अंगों में मानव व्यक्तित्व का विकास	१९५७
२. कृष्णा सिन्हा	गुप्तकालीन नाटकों के नारीपात्र	१९५९
३. विष्णुदेव शर्मा	ऋग्वेदकालीन आचार	१९६०
४. वनमाला भवालकर	महाभारत में नारी (प्रकाशितः)	१९६१
५. रामगोपाल मिश्र	संस्कृत पत्रकारिता का विकास (प्रकाशितः)	१९६४
६. पद्मा भार्गव	पुराणों में सामाजिक उत्सव	१९६४
७. हीरालाल शुक्ल	अप्पाशास्त्रीराशिवडेकरः कृतियों का अध्ययन	१९६४
८. शशिबाला	महाभारत में धर्म	१९६४

९. इन्द्रजित उप्पल	महाभारत में शिक्षा	१९६५
१०. प्रेमलता पचौरी	महाभारत में आचार	१९६५
११. किशोर त्रिपाठी	भागवत का सांस्कृतिक अनुशीलन	१९६५
१२. प्रेमनारायण द्विवेद्वी	वैष्णव पुराणों में आचार	१९६५
१३. गोतमप्रसाद मिश्र	संस्कृत साहित्य में परिजात-हरण कथा का विकास	१९६५
१४. कन्हैया द्विवेदी	बीसवीं शती में म.प्र. में संस्कृत अध्ययन का विकास	१९६५
१५. साधना गुप्ता	प्रमुख उपनिषदों में सांस्कृतिक प्रवृत्तियाँ	१९६६
१६. कृष्णकान्ता	क्षमाराव : कृतियों का अध्ययन	१९६६
१७. पी.डी.जैन	आचारांग सूत्र : एक अध्ययन	१९६६
१८. शिवदर्शन तिवारी	१९ वीं शताब्दी में संस्कृत रूपकों का विकास	१९६७
१९. मनोरमा सक्सेना	यतींद्रविमल चौधुरी-कृतियों का अध्ययन	१९६७
२०. कृष्णा खरे	१९ वीं शती में संस्कृत गीति काव्य का विकास	१९६७
२१. माया तिवारी	२०वीं शती में संस्कृत गीति काव्य का विकास	१९६७
२२. विजय लक्ष्मी कक्कड़	संस्कृत साहित्य में गंगावतरण कथा	१९६८

२३. गौतम प्रसाद शुक्ल	अमरकोष में भारतीय संस्कृति	१९६८
२४. गणेश प्रसाद	१६वीं शताब्दी के संस्कृत रूपक	१९७१
२५. सुदर्शन त्रिपाठी	महालिंग शास्त्री–व्यक्तित्व और कृतित्व	१९७१
२६. अच्युतानंद झा	रामावतार शर्मा	१९७०
२७. शंकरलाल स्वर्णकार	१७वीं शताब्दी के संस्कृत रूपक	१९७०
२८. बिहारीलाल नागार्च	१८ वीं शताब्दी के संस्कृत रूपक	१९७०
२९. गुलाबचंद जैन	२०वीं शताब्दी के संस्कृत रूपक	१९७०
३०. राधावल्लभ त्रिपाठी	संस्कृत कवियों के व्यक्तित्व का विकास (प्रकाशितः)	१९७२
३१. कन्हैया पांडेय	१९वीं शती के संस्कृत महाकाव्य	१९७३
३२. पन्नालाल जैन	जीवन्धरचम्पू : एक अध्ययन (प्रकाशितः)	१९७३
३३. रंजना मिश्र	संस्कृत नाटकों में प्रकृति चित्रण	१९७५
३४. गायत्री देव	संस्कृत नाटकों में आचार	१९७५
३५. जय प्रसाद वार्ष्णेय	महाभारत और अर्थशास्त्र का तुलनात्मक अध्ययन	१९७६
३६. वीरेन्द्र पटेल	महाभारत में प्रकृति चित्रण	१९७६
३७. कु.वीणा ओखदे	संस्कृत में निबन्ध शैली का विकास	१९७६

३८. रविनन्दन त्रिपाठी	संस्कृत में व्यायोग का विकास	१९७७
३९. कु.कुसुम भूरिया	कालिदास का नाट्य-शास्त्रीय अनुशीलन	१९७८
४०. श्री इन्द्रमोहन	भास का नाट्यशास्त्रीय अनुशीलन	१९७९
४१. कु.गायत्री श्रीवास्तव	संस्कृत साहित्य में ऐतिहासिक नाटक का विकास	१९८०
४२. श्रीमती अर्चना मिश्रा	महाभारत में जीवन मूल्य	१९८०
४३. गोपीकृष्ण द्विवेदी	महाभारत में संग्रामनीति	१९८०
४४. कु.आशा सर्वटे	डॉ.व्ही.राघवन्-व्यक्तित्व तथा कृतित्व (प्रकाशितः)	१९८५
४५. रामलखन पाण्डेय	सत्रहवीं शताब्दी के संस्कृत महाकाव्य	१९८५

श्रीरामज्युपाध्यायसाहित्यसमीक्षणम्

-रमाकान्तपाण्डेयः

१९२० तमे क्राइष्टाब्दे लब्धजनेरुपाध्यायस्य श्रीमद्रामजी-महाभागस्य उत्तरप्रदेशस्य बलियाजनपदान्तर्वर्तिनि मलेजीतिग्राम-वास्तव्यस्य नाम कः खलु सुरभारतीसमुपासको न जानाति । पित्रा महावीरोपाध्यायेन लालितः लब्धसंस्कारश्चायं वटुः स्वग्रामशालायां प्राथमिककक्षासु पठन् किमप्यपूर्वमेव सारस्वतं नैपुण्यं प्रदर्शितवानिति जनकेनायमुच्चशिक्षाप्राप्त्यर्थं वाराणसीं प्रेषितः। तत्र श्रीलक्ष्मणशास्त्रितैलङ्गानां स्वनामधन्यविदुषां श्रीचरणेषु स्थित्वा व्याकरणादिशास्त्राण्यपठत् । ततश्च प्राच्यपाश्चात्येत्युभयविधविद्या- विलासभूमित्वेन प्रसिद्धं प्रयागनगरं समवाप्य आधुनिकदृष्ट्या शास्त्रसमीक्षणसमीहया बाबूराम-सक्सेनामहाभागानाम् अन्तेवासित्वं स्वीकृतवान् । समधिगत-वैदुषीकस्ततश्चायं ७.७.१९४७ तमे दिनाङ्के सागरविश्व-विद्यालयस्य संस्थापककुलपतिना सरहरीसिंहगौरमहाभागेन स्वविश्वविद्यालयस्य संस्कृतविभागे व्याख्यातृपदे नियोजितः । यथैव सुरभारतीं तथैव प्राकृतभारतीं सेवमानः उपाध्यायोऽयम् "उपाध्याय " इति स्वोपनाम सार्थकीकुर्वन् विद्यार्थिवर्गे विद्वद्वर्गे च महतीं प्रसिद्धिं प्राप । न केवलमध्यापनपाटवेन अनुसन्धानपटुतया

चाप्ययं स्वीयामक्षुण्णां कीर्तिं प्रासारयदिति अज्ञानक्षारपूरितं सागरं महानुभावस्यास्य संसर्गेण काशीत्वेन पर्यणमत् मध्यप्रदेशे । अस्यानुसन्धानाध्यापनचातुरीं वीक्ष्य विश्व-विद्यालयप्रशासनेन अयमत्रैव ११.७.१९५७ तमे दिनाङ्के प्रवाचकपदे नियुक्तः । अनन्तरं च १.९.१९६३ तमे दिनाङ्के स्ववैदुष्यप्रभावाद् आचार्यपदं संप्राप्य १.७.१९८० दिनाङ्कं यावद् अस्य विभागस्य आध्यक्ष्यमुद्वहन्नसौ अस्मिन्नेव दिनाङ्के विश्वविद्यालयसेवातो निवृत्तः ।

विविधकाव्यकाव्यशास्त्रीयग्रन्थसमीक्षकपदवीं समारू-ढोऽयं विशेषतो नाट्यशास्त्रीयपरम्पराया उत्थाने भारतीय-संस्कृतेश्च संरक्षणे दत्तावधानो दृश्यते । क्वचित् काव्य-प्रणयनेऽपि रुचिरस्य विलोक्यते । तद्यथा राजेन्द्रस्य युद्धोद्योग इति कवितायाम् -

विश्ववन्द्यभारतदेशः,
हिंसां प्रति निष्कामः ।
न भवेत् सेना
आदर्शः संस्थाप्यः ।।

अस्य कृतयः त्रिधा विभिद्यन्ते -

१- भारतीयसंस्कृतिसम्बन्धिनो ग्रन्थाः

२- नाटकोपन्यासग्रन्थाः

३- समीक्षाग्रन्थाः अनुसन्धानग्रन्थाश्च

१- भारतीयसंस्कृतिसम्बन्धिनो ग्रन्थाः -

प्राचीनभारतीयसाहित्य की सांस्कृतिकभूमिका इति

महाप्रबन्धमुपस्थाप्य श्रीमानुपाध्यायो लब्धवान् सागर-विश्वविद्यालयस्य "डी.लिट्." इत्युपाधिम् । भारतीयसंस्कृति-सौरभम् इत्यस्मिन् महाग्रन्थे भारतीयसंस्कृतेः नानारूपाणि प्रतिपाद्य विदेशेषु वर्णव्यवस्था ,विदेशेषु अवगुण्ठनम् , अल्लाहमन्दिरम् , ग्रीकवैदिकधर्मयोः साम्यम् , ईरान-भारतयोः सम्बन्धाः , चीनदेशेन सम्बन्धः, वैदेशिकैः संव्यवहारः इत्यादिविविधविषयप्रतिपादनव्याजेन संस्कृतेरस्याः विश्वमुखत्वं निरूपितवान् ।संस्कृतिसम्बन्धिनोऽन्येऽपि चत्वारो ग्रन्थाः विदुषोऽस्य लभ्यन्ते -

१- प्राचीनभारतीयसंस्कृतिः

२- संस्कृतिसाधना

३-भारतस्य सांस्कृतिकनिधिः

४- भारतीय संस्कृति का उत्थान

२- नाटकोपन्यासग्रन्थाः -

श्रीमानुपाध्यायः कुशलश्चिन्तको निर्भीकश्च लेखको विद्यते । अनेन प्रणीतं नाटकद्वयं "सीताभ्युदयम् "

"कैकेयीविजयम् " चेति प्रसिद्धम् । सीताचरितमुपजीव्य प्रणीते सीताभ्युदयम् इति षडङ्के नाटके लङ्काविजयानन्तरं रजकमुखादुत्थापितां सीताविषयिणीं विसङ्गतिमपाकर्तुं स्वकल्पितां कथां योजयति कविः। सीतायाः परित्यागः भारतीयसंस्कृतेः कलङ्कत्वेन वदन्ति समीक्षकाः इति उपाध्यायवर्योऽयं तद्दूरीकर्तुं तत्र परिवर्तनं करोति । रामेण सीता न परित्यक्ता , सा तु मुनेः वसिष्ठस्य आज्ञया आदिकवेः वाल्मीक्याश्रमे निवासं कृतवती । अभुक्तमूलनक्षत्रे पुत्रजननापराधं शमयितुमेव तत्र सीतायाः निवासः कल्पितः ।

एवमेव सीतायाः पातालगमनमनुचितं मन्वानः उपाध्यायकविस्तस्याः मात्रा पृथिव्या सह तत्र गमनं निरूपयति । भारतीयसंस्कृतेः रामकथामाध्यमेन प्रचार एव सीतायास्तत्र गमनस्य प्रयोजनत्वेन निरूपितः कविना ।

कैकेयीविजयं नाम कवेरुपाध्यायस्य द्वितीया नाट्यकृतिः। पञ्चाङ्केऽस्मिन् नाटके कैकेय्या निर्दुष्टमुदारचरितं वर्णितं कविना पौराणिकाख्यानानामुपजीव्यतयेति कैकेयीचरितस्य कश्चन अज्ञातपक्षो ग्रन्थेनानेनोपस्थाप्यते । ग्रन्थस्य आमुखे स्वपक्षसाधनाय कथ्यस्य विस्ताराय च तत्तत्पौराणिकोपाख्यानानां कैकेयीचरितसम्बन्धिनां चर्चा कृता ।

ब्रह्मणः प्रेरणयैव कैकेयी रामं वनं प्रेषयितुं प्रवृत्ता बभूव । नाटकीयसङ्घटनानां संयोजनेऽपीह कविर्विशिष्यते । संस्कृतसाहित्ये कैकेयी प्रथमवीराङ्गनारूपेण प्रतिष्ठापिता कविना उपाध्यायेन । राष्ट्ररक्षायै तया नैकानि कार्याणि सम्पादितानि ।

द्वासुपर्णा सत्यहरिश्चन्द्रोदयं चेति द्वावुपन्यासौ कवेः प्रकाशितौ। द्वासुपर्णायां पुराणप्रसिद्धां कृष्णसुदाम्नोः मैत्रीकथामाश्रित्य महात्मगान्धिनः ग्रामाभ्युदययोजनां सुदाम्नः धर्मपत्न्या कौमुद्या सञ्चालितामभिनवपरिवर्तनरूपेण वर्णितवान् कविः ।

सत्यहरिश्चन्द्रोदयेऽपि केषाञ्चित् तत्त्वानां परिवर्तनं लक्ष्यते। तद्यथा -

१ - पुत्रलाभार्थं वरुणानुग्रहमुद्दिश्य हरिश्चन्द्रोऽयोध्यातः सुन्दरवनं पद्भ्यां गत्वा तत्र तपोऽतप्यतेति कथारम्भे नव्यं तत्त्वं प्ररोचितम्।

२ - रोहिताश्वस्य उपनयनकालतोऽन्तेवासीभूय वरुणकुले समावर्तनं यावदध्ययनम् ।

३ - अत्रान्तरे मायारोहितो हरिश्चन्द्राय वरुणं नियुङ्क्ते ।

४ - त्रेतायुगे सत्यस्य ह्रासो जात इति संवादेन चिन्तितो ब्रह्मा देवर्षीन् परामृश्य विश्वामित्रं हरिश्चन्द्रस्य घोरपरीक्षार्थं नियोजयति ।

५ - काशिराजो हरिश्चन्द्रस्य स्वागतार्थं काशीनगरीं सज्जयामास । हरिश्चन्द्रं स्वातिथिं विधाय विश्वामित्राय लक्षमुद्रां दातुं योजनां विदधाति।

६ - विश्वामित्रः काशिराजयोजनां योगदृष्ट्या विज्ञाय हरिश्चन्द्रादीनां दासरूपं मायया विदधाति ।

७ - महाश्मशानस्य सौन्दर्यं संवर्धयितुकामो हरिश्चन्द्रः सहकर्मिणां साहाय्येन असाधारणं साफल्यमवाप्नोति ।

८ - हरिश्चन्द्रो रोहिताश्वस्य शवं स्वयमेव गङ्गामध्ये प्रवाहयति ।

९ - वरुणकुले विनीतो हरिश्चन्द्रपुत्रो रोहिताश्वो गुरूणामादेशेन निश्चेतनं पितरं तटं प्रापयति ।

१० - ब्रह्मादयो देवास्तस्मै परीक्षा-विवरणमुद्घाटयन्ति सदेहं हरिश्चन्द्रपरिवारं स्वर्गलोकं च नयन्ति ।

एवं पारम्परिककथासु युगानुरूपत्वप्रतिपादनमेव श्रीमदुपाध्यायस्य काव्यप्रणयनप्रयोजनमिति वक्तुं शक्यते ।

३-समीक्षाग्रन्थाः अनुसन्धानग्रन्थाश्च -

श्रीमदुपाध्यायेन हिन्दी-संस्कृत-आङ्गलभाषासु पञ्चाशत्प्राया ग्रन्थाः प्रणीताः। तेषु दशरूपकतत्त्वदर्शनम्, नाट्यशास्त्रीयानुसन्धानम् चेति द्वौ ग्रन्थौ विद्वत्कुले समधिकमभिनन्द्येते । उपाध्यायमहाभागानामन्येऽपि केचन प्रसिद्धाः ग्रन्थाः सन्ति -

१-संस्कृतसाहित्य का इतिहास (भागद्वयात्मकम्)

२- संस्कृत के महाकाव्य और कवि

३ - महाभारतीयसंस्कृतिकोशः
४ - नाट्यशास्त्रीयपारिभाषिकशब्दानुक्रमणिका
५ - मध्यकालिकः संस्कृतनाटकालोकः
६ - आधुनिकसंस्कृतनाटक
७ - नाट्यशास्त्रीयप्रयोगविज्ञानम्
८ - महाकवि कालिदास
९ - विंशशताब्दिकसंस्कृतनाटकालोकः
१० - Sanskrit and Prakrit Mahakavyas
११-भारतीयसंस्कृतिसौरभम्

भारतीयसंस्कृतेः समुपासकोऽयं मनीषी अद्यापि सारस्वतसेवायां संलग्नो विद्यते । विविधसंस्कृतिविरोधिष्वाख्यानेषु परिवर्तनं परिकल्प्य कविरयं भारतीयां संस्कृतिं संस्कृतसाहित्यं च नव्यभूमौ नयतीति दिक् ।

संस्कृतगौरवम्

महात्मनो बुद्धस्य दर्शनम्, आधुनिकं विश्वं च

डॉ० शङ्करदयालः शर्मा

सारनाथमागत्य अतीव प्रसन्नतामनुभवामि। अत्र महर्षिभिर्विचक्षणैश्च मानवजीवनस्य लौकिका आध्यात्मिकाश्च पक्षाः सुविचारिताः। अस्या एव भूमेः भगवतो बुद्धस्य शान्तिसद्भावनयोर्मानवीयः सन्देशो लोके प्रकाशं गतः। अनेन संवर्धितमस्माकं प्राचीनं जीवनमूल्यम्, सभ्यतासंस्कृतिश्च दार्ढ्यमापादिते। तस्य शाश्वतेन सन्देशेन युगे युगे सम्प्रेरिता मानवजातिः। भगवता बुद्धेन उपदिष्टानि करुणा- सर्वभूतहितैषिता- समता- मानवीयगौरवादि- सार्वभौमानि मूल्यानि अस्माकं समाजस्य राष्ट्रियतायाः व्यक्तित्वस्य च सुदृढं नैतिकम् आधारं द्रढयन्ति। इमान्येव अस्मत्स्वातन्त्र्यसङ्ग्रामे सिद्धान्तवाहीनि आसन्। इमानि मूल्यानि अस्माकं राष्ट्रचिह्ने अशोकसिंहध्वजे अस्मत्सार्वभौमत्वप्रतीकानि सन्ति। चत्वारः सिंहाः चतुर्दिङ्मुखाः विश्वं प्रति भारतस्य सन्देशमिव ददति। सर्वसमादृतमस्माकं राष्ट्रध्वजं जीवन-नियम-सत्यमयं धर्मचक्रं विभूषयतीव।

गौरवास्पदमिदं मे सारनाथागमनं, यत्र प्रवर्तितं प्रथमं धर्मचक्रं भगवता बुद्धेन। अवसरोऽयं मत्कृते बौद्धदर्शनस्य अध्यापकैः छात्रैश्च सह परस्परविचारविनिमयाय। प्रसन्नं नश्चेतो यत् केन्द्रिय-उच्च-तिब्बती-शिक्षा संस्थानेन परम्परागतबौद्धशिक्षापद्धतिः पुनरुज्जीव्यते। धन्यवादोऽस्ति मे तान् प्रति ये विभिन्नबौद्धदर्शनपक्षान् विवेचितवन्तः, अर्जितवन्तो विद्याम्, सञ्चितवन्तो ज्ञानम्, अथ समाद्रियन्तेऽत्र दीक्षान्तसमारोहे।

सम्प्रति बौद्धदर्शनस्य प्रासङ्गिकतैव विचार्यते मया। यथा यथा पठामि बुद्धदेशनां तथा तथा वर्तमानसमाजस्य जीवनस्य च कृते

तदर्थस्य गम्भीरतां महत्त्वं चानुभवामि । तथागतसन्देशः न केवलं व्यक्तिगताचरणार्थं परस्परव्यवहारार्थं वा महत्त्वपूर्णः अपितु अस्त्यस्य विशिष्टं महत्त्वं अस्माकं समाजकृते, राष्ट्रकृते, राष्ट्रीयसम्बन्धव्यवस्थापनकृते, वस्तुतस्तु समग्रमानवतायाः कृते ।

शाक्यमुनिः मनुष्याणां विचारेषु क्रियासु च मनसः पूर्वङ्गमत्वं प्रतिपादयति । सम्यक् चरित्रं मनसः शुद्धयैवाप्तुं शक्यते । आजीवनं स्वकीयचरितस्य विचारस्य च शुद्धया सः प्रदर्शितवान् यत् आत्मसाक्षात्कारमार्गो निर्वाणम् मनसः शुद्धयैव प्राप्तुं शक्यते । धम्मपदस्य प्रशस्ता प्रथमा एव गाथा विद्यते—

मनोपुब्बङ्गमा धम्मा मनोसेट्ठा मनोमया ।
मनसा चे पदुट्ठेन भासति वा करोति वा ।
ततो नं दुःखमन्वेति चक्कंव वहतो पदम् ।।

द्वितीया गाथाऽस्ति—

मनोपुब्बंगमा धम्मा मनोसेट्ठा मनोमया ।
मनसा चे पसन्नेन भासति वा करोति वा ।
ततो नं सुखमन्वेति छायाव अनपायिनी ।।

स्मरणीयो स सन्दर्भः कालश्च यदा बुद्ध एतद्दर्शनं दिष्टवान् । आसीत् स कालो यदा प्रतिष्ठिता धर्माः संस्थापिताः, यत्र अन्धविश्वासः अन्धश्रद्धा आभिजात्याश्रिता अभवन् प्रतिष्ठाधारभूमयः । यथा लिखितम् पण्डित-जवाहरलालनेहरूमहोदयेन स्वकीये ग्रन्थे 'डिस्कवरी आफ् इण्डिया' इति नाम्नि ।

"बुद्धेन प्राप्तं तत् साहसं येन प्रचलितधर्माः, अन्धविश्वासः, पौरोहित्यकर्मकाण्डः वैयक्तिको रागश्च घातिताः । स तत्त्वैकपरान् परमार्थविषयकान् विचारान्, कौतुकक्रियाः, प्रदर्शनानि, अतिमानवीयानि कृत्यानि च विगर्हितवान् । सः तर्कं, न्यायं अनुभवं च समर्थितवान्, नैतिकमूल्येषु तेन बलं दत्तम्, तस्य विचारपद्धतिश्चासीत् मनोवैज्ञानिकी । तस्य विचाराः अनाघ्रेय आध्यात्मिकवितण्डानन्तरम् पर्वताद् आगच्छन्तः शुद्धवायुप्रश्वासा इव आह्लादकाः" ।

अयमासीत् स सन्दर्भो यदा बुद्धेन प्रवर्तितं स्वकीयं सुविचारितं चरित्र-विचार-दर्शनम् । स सर्वान् जनान् उपादिशद् यत् न केवलं स्व-स्व-दर्शन-व्यवहारेषु स्तरीयो विवेकः तर्को वाश्रयणीयः अपितु तं प्रत्यपि । अङ्गुत्तरनिकाये बुद्धः कालामजनान् उक्तवान्—

एस तुम्हे, कालामा, मा अनुस्सवेन, मा परम्पराय, मा इतिकिरियाय, मा पिटकसम्पदानेन, मा तक्कहेतु, मा नयहेतु, मा आकारपरिवितक्केन मा भब्बरूपताय, मा समणो नो गरुति । यदा तुम्हे, कालामा, अत्तनाव जानेय्याथ—'इमे धम्मा अकुसला, इमे धम्मा सावज्जा, इमे धम्मा विञ्ञुगरहिता, इमे धम्मा....अहिताय दुक्खाय संवत्तन्ति । इति ।

एवंविध आसीत् तस्य विश्वासो यत्रोदारविचाराणां प्रामुख्यम्, यतः स आदिष्टवान् जनान् यत्ते अविचारपूर्वकं तस्यापि वचांसि न स्वीकुर्युः अस्ति तद्वचनं शान्तरक्षितस्य तत्त्वसङ्ग्रहे-

तापाच्छेदाच् च निकषात् सुवर्णमिव पण्डितैः ।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात् ।।

एभिःसुशब्दैर्व्यज्यते भगवतो बुद्धस्य विनम्रता महत्ता च तदुपदेशस्य । केवलं बुद्ध एव, यः सर्वम् अहङ्कारं रागं च व्यापोहत, स एव एतादृशीं विनम्रतां प्रदर्शयितुं समर्थः ।

प्रभवति प्रवहति च बुद्धदर्शनसारो मध्यमप्रतिपदः यां सः स्वकीये धर्मचक्रप्रवर्तने उपदिष्टवान् । अस्मिन् एव पुण्यतमे सारनाथे मृगदाये स उवाच—

'एते ते भिक्खवे, उभो अन्ते अनुपगम्म मज्झिमापटिपदा तथागतेन अभिसम्बुद्धा चक्खुकरणी ञाणकरणी उपसमाय अभिञ्ञाय सम्बोधाया निब्बानाय संवत्तति ।'

तदुपदेशेषु अतीव सशक्तम् उद्बोधनं जनाय समाजाय च विद्यते यत् जीवनस्य प्रतिक्षेत्रे असन्तुलनं विहाय अन्तद्वयं प्रहातव्यम् । जनकृते सम्यक्चर्या विद्यते कर्मविचारयोः समञ्जस-सन्तुलित-अनुग्राभ्यासात् । यथोक्तं विसुद्धिमग्गे—

चतुस्सच्चपरिवेधाय पटिपन्नस्स योगिनो निब्बानारम्भणं

अविज्जानुसयसमुग्घातकं पञ्ञाचक्खु सम्मादिट्ठि ।
मिच्छाहसङ्कप्पनिघातकं चेतसो निब्बानंपदाभिनिरोपनं सम्मासङ्कप्पो ।
वचोदुच्चरितसमुग्घातिका मिच्छावाचाय विरति सम्मावाचा नाम ।
मिच्छाकम्मन्तसमुच्छेदिका पाणातिपातादिविरति सम्माकम्मन्तो नाम ।
कुहनादिउपच्छेदिका मिच्छाजीवविरति, सो सम्माआजीवो नाम ।
कोसज्जसमुच्छेदको विरियारम्भो, एस सम्मावायामो नाम ।
मिच्छासतिविनिद्धुननो चेतसो असम्मोसो सम्मासति नाम ।
मिच्छासमाधिविनिहंसिका चित्तेकग्गता सम्मासमाधि नाम ।

सत्यान्वेषिणां कृते एवं विनिदर्शित आष्टाङ्गिक आर्यमार्गः । सम्यक्दृष्टिः तन्मार्गं प्रकाशयिष्यति, सम्यक्सङ्कल्पो भविष्यति निदर्शकः, सम्यक्वाक् भविष्यति तस्य मार्गे विश्रामस्थलम्, तद्गतिः ऋजु भविष्यति, यतो हि इदं सम्यगाचरणम्....तस्य सम्यगाजीवो भविष्यति पाथेयः, सम्यक्व्यायामः तस्य पदानि, सम्यक्विचाराः तस्य श्वासः, सम्यक्समाधिश्च तां शान्तिं प्रदास्यति या तत्पदचिह्नानि अनुगच्छति ।

एवमेव बुद्धेन आत्मनियन्त्रणाय बलमाहितम् । तेनोपदिष्टम्—

चक्खुना संवरो साधु साधु सोतेन संवरो ।
घानेन संवरो साधु साधु जिव्हाय संवरो ।।
कायेन संवरो साधु साधु वाचाय संवरो ।
मनसा संवरो साधु साधु सब्बत्थसंवरो ।
सब्बत्थ संवुतो भिक्खु सब्बदुक्खा पमुच्चति ।।

धम्मपद २५. (१) ३६०, ३६१

बुद्धोपदेशा आसन् न सब्बपापस्स अकरणाय, कुशलस्य सम्पादनाय, चित्तशुद्धया तद्विशोधनाय । तदेव दर्शनं अस्याम् धम्मपदगाथायां व्यञ्जितम्—

सब्बपापस्स अकरणं कुसलस्य उपसंपदा ।
सचित्तपरियोदपनं एतं बुद्धान सासनं ।।

धम्मपद १४ (४) १८३

इमे बौद्धसिद्धान्ताः न केवलम् एकस्यैव जनस्य दुःख-निराकर्त्तुकामस्य निर्वाणकामस्य वा कृते हितावहाः, अपितु सम्पूर्ण-समाजस्य अभ्युदयाय समृद्धये च समानतया महत्त्वपूर्णाः सन्ति । एक-

गष्ट्रकृत तु मध्यमाप्रतिपद् अथवा उभयान्तप्रहाणं एकां राजनीतिकीं पद्धतिं निर्दिशति या परस्परसंवाद-सहयोग-समन्वयान् आश्रिता । अत्र समाहितः स प्रयासः यत्र अधिकतमजनानां अधिकतमं हितं समन्वितम्। अत्र विद्यते तर्कविवेकाश्रितः स प्रजातान्त्रिकः संवादोपसंवादो येन लोकहितकारिणो विषया सर्वसम्मत्या निर्णेतुं शक्यन्ते ।

महापरिनिब्बानसुत्ते क्षान्तिम् भिक्षून् उपदिशन् बुद्धो यदवदत् तत्तु प्रजातान्त्रिकसमाजरचनाकृते महाविधायितन्त्रं भवितुमर्हति । ततोऽहं वक्ष्ये एकमुद्धरणं यद् अस्माकं कृते निर्विशेषमहत्त्वपूर्णं विद्यते यतो यतामहे वयम् प्रजातान्त्रिकमार्गानुगमनाय । अस्मिन् उद्धरणे विनिविष्टो गम्भीरोऽर्थः य अपेक्षतेऽवधानं विवेचनां व्यवहाराचरणञ्च । तदुद्धरणं तु इदम्—

यावकीवं च भिक्खवे, भिक्खू अभिण्हं सन्निपाता सन्निपातबहुला भविस्सन्ति ।

यावकीवं च भिक्खवे, भिक्खू समग्गा सन्निपतिस्सन्ति, समग्गा वुट्ठहिस्सन्ति, समग्गा सङ्घिकरणीयानि करिस्सन्ति ।

यावकीवं च भिक्खवे, भिक्खू अपञ्ञत्तं न पञ्ञपेस्सन्ति, पञ्ञत्तं न समुच्छिन्दिस्सन्ति, यथा पञ्ञत्तेसु सिक्खापदेसु समादाय वत्तिस्सन्ति ।

यावकीवं च, भिक्खवे, भिक्खू ये ते भिक्खू थेरा रत्तञ्ञू चिरपब्बजिता सङ्घपितरो सङ्घपरिणायका ते सक्करिस्सन्ति गरुं करिस्सन्ति मानेस्सन्ति पूजेस्सन्ति तेसं च सोतब्बं मञ्ञिस्सन्ति ।

यावकीवं च, भिक्खवे, भिक्खू उप्पन्नाय तण्हाय पोनोब्भविकाय न वसं गच्छिस्सन्ति... ।

यावकीवं च, भिक्खवे, भिक्खू आरञ्ञकेसु सेनासनेसु सापेक्खा भविस्सन्ति ।

यावकीवं च, भिक्खवे, भिक्खू पच्चत्तञ्ञेव सतिं उपत्थपेस्सन्ति'', किन्ति अनागता च पेसला सब्रह्मचारी आगच्छेय्युं, आगता च पेसला सब्रह्मचारी फासु विहरेय्युं' ति ।

यावकीवं च, भिक्खवे, इमे सत्त अपरिहानिया धम्मा भिक्खुसुठस्सन्ति इमेसु च सत्तसु अपरिहानियेसु धम्मेसु भिक्खू सन्दिस्सिस्सन्ति, वुद्धियेव भिक्खवे, भिक्खूनं पाटिकङ्खा, नो परिहानि ।

सम्यक्कर्मान्त-प्रजातान्त्रिकमूल्योपदेशनोपरि बलाधानातिरिक्तम्, इयमासीत् बुद्धस्य दृढा अवधारणा यत् सङ्घव्यवस्थाकृते एकस्मिन्नेव जने सर्वाधिकारो न न्यस्तव्यः । शिष्यैः प्रष्टे सति यत् को भविष्यति मार्गोपदेष्टा बुद्धानन्तरम्, स उवाच 'धर्म' इति, धर्मविनय एव चरमः । इयं देशना या पञ्चशतोत्तरद्विसहस्रवर्षेभ्योऽपि पुरातनी, संभवतो न कदापि तथा समीचीना यथा सम्प्रति विद्यते । विराजते इयं अस्माकं संविधानेषु स्पन्दनशीलासु प्रजातान्त्रिकसंस्थासु च । सा आस्ते अस्माकं निरवच्छिन्नप्रेरणास्रोतः मार्गदर्शिका च । इदं तु बहुषु एकम् उदाहरणं मया प्रस्तुतं यत्र संकेतितम् अस्माकम् आधुनिकराष्ट्रस्य प्राचीन-मूल्यपरम्परासु ।

प्रजातान्त्रिकेन उपायेन परस्परघोरविरोधिष्वपि विचारेषु संवादेन समन्वयसेतुः स्थापितः । यथा बुद्धोऽवदत् धम्मपदे—

न हि वेरेन वेरानि सम्मन्तीध कुदाचन ।
अवेरेन च सम्मन्ति एस धम्मो सनन्तनो ।। धम्मपद १ (४) ५

बुद्धस्य मुख्यतमेषु उपदेशेषु तर्क-विवेकाश्रिता एका प्रजातान्त्रिकी पद्धतिः अस्ति अहिंसा शान्तिश्च ।

आसीत् सा एका धर्मान्तरीया सरणिः तस्मात् सा स्वीकरणीयेषु मूल्येषु सिद्धान्तेषु च व्यवस्थापिता । असंशयमेव बौद्धपरम्परा सर्वविभिन्नविचारदर्शनानि प्रति स्वकीयं प्रवेशद्वारं समुद्घाट्य एव तिष्ठति ।

इमे विचाराः सादरं समूढाः, यथोपलभ्यन्ते वर्तमानपेशावरसमीपे सम्राट्-अशोक संस्थापिते शाहबाजगढ़ी-शिलालेखे—

सल वढि तु बहुविध
तस तू इयो गुल यं वचगुति किति अतप्रषंडपुज
व पापषंडभारन व नो सिय
अपकरणसि लहुक व सिय तसि प्रकरणे,
पुजेतविय व चु परप्रषंड तेन तेन अकरेन,
एवं करतं अतप्रषंड वढेति, परप्रषंडंस पि च उपकरोति,
तद अथ करमिनो अत्रप्रषंडं, क्षणति परप्रषंडंस च अपकरोति,

यो हि कचि अतप्रषंडं पुजेति परप्रषंडं
गरहति सव्रे सत्तप्रषंडभतिय व किति अंतप्रषंडं
दिपयाम ति सा च पुन तथ करंतं
सो च पुन तथ करतं वढ़तरं उपहंसि
अतप्रषंडं ।

अस्माभि बुद्धोपदेशेभ्यो ग्रहणीया अवलम्बनीया च प्रेरणा, अथ च यथाशक्ति यथामति च स्व-स्वविचारकर्मसु निधेया च ।

अत्र तर्क-समञ्जस-विचारे अन्तर्निहिता विद्यन्ते सर्वभूतकृते करुणा, प्रेम, मानवगौरवं प्रति श्रद्धा च । बुद्धानुसारं तु समा एव सर्वे मनुष्याः । पृथिव्यां सर्वे जनाः दुःखमनुभवन्ति, सर्वे चार्हन्ति मोक्षम् निर्वाणम् । वर्णव्यवस्थाविरुद्धाः सोऽवमन्यतेस्म आभिजात्यम् उच्चावचभावमयीं समाजसंरचनाम्, यया रचनात्मिका प्रगतिः अवरुद्धा, मानव एव मानवेन सह विरोधमानीतः । सुत्तनिपाते बुद्धोऽवदत् यत् सम्यगाचरणमेव जनस्य श्रेष्ठतां निर्धारयति, न जन्मना न वर्णेन प्रशस्यो भवति अपितु सत्कर्मणैव । स एव भावो व्यञ्जितो बुद्धेन धम्मपदस्य सुगाथाद्वये—

दूरे सन्तो पकासेन्ति हिमवन्तो व पब्बतो ।
असन्तेत्थ न दिस्सन्ति रत्तिं खित्ता यथा सरा ।। २१ (८) ३०४ ।।

न पुप्फगन्धो पतिवातमेति न चंदनं तगरमल्लिका वा ।
सतं च गन्धो पतिवातमेति सब्बा दिसा सप्पुरिसो पवायति ।।
।।४ (९) ५४।।

सुपरिचिता एव वयं जातककथाभिः यानिधानं ज्ञानस्य प्रज्ञायाश्च । ताम्य एव बौद्धकालीन जीवनपरिचयोऽपि प्राप्यते । ताभिः कथाभिः सुसूक्ष्मतया प्रकाश्यते यत् कथं सार्ववार्णिकः समुदायः बुद्धम् श्रयति स्म, धर्मं च शरणं गतः । लघ्वभिजातसमूहसमाद्रितां संस्कृतभाषां विहाय 'संकाय निरुत्तिया' शिक्षाकरणाय यदुपदेशो बुद्धेन दत्तः तत्रापि तस्य समतां भेदभावविहीनां दृष्टिं प्रति प्रतिबद्धता परिलक्ष्यते ।

वस्तुतः तेन सा भाषा प्रयोगाश्च स्वीकृता ये जनसामान्यतः प्रादुर्भूताः, तैरेव अव्यवहितरूपेण विचाराः पृथग्जनग्राह्याः कृताः

आसन् । जनसामान्यजीवनप्रयुज्यमानाः पुष्पगन्ध-पर्वतादीनाम् उपमाः लोकोक्तयश्च-यथा धम्मपदे उदाहरणरूपेण निर्दिष्टाः—तत्प्रचारितदर्शनं जनजीवननिकटम् आनयन्ति स्म । भगवान् बुद्धः चक्रस्य अतिसाधारणं प्रतीकं गम्भीरान् सिद्धान्तान् सत्यं च व्याचिख्यासुः प्रायुञ्जत् । स उपदिदेश यत् चक्रस्य अराः शुद्धचरणनियमसदृशाः । न्यायस्तु तेषां समरूपं दैर्घ्यम्, ज्ञानम् प्रावरकम्, मार्दवं विचारशीलत्वं च परिधिवृत्तं यत्र समायोजितः अविचलाः सत्यस्य अक्षाः ।

सौविध्यविहीनान् जनान् प्रति सद्भावः, प्रेम-करुणा च सर्वान् जीवान् प्रति तस्य दया-दानमयेषु चरितेषु सर्वत्र अवलोक्यन्ते । एतादृशैरेव कर्मभिः पुण्यम् अर्जनीयम् आसीत् । कोऽपि उपहारो न दानमात्रम् अपितु धर्मपर्यायः । तत्र सन्निहितः साहाय्यकर्त्तव्यभावः, विशेषतस्तु दुःखितान् साधनहीनान् प्रति । सुविख्यातो बुद्धशासनानुगामी सम्राट् अशोकः स्वकीये साम्राज्ये बहूनि जनकार्याणि स्थापितवान्, यैः लोकस्य सुष्ठुजीवनं संवर्धितम् । तेनैव जलसिञ्चनपरियोजनाः प्रचालिताः धर्मशालाः औषधालयाश्च निर्मापिताः, स्वकीयधर्माङ्कतया सेतवः राजपथाश्च कारिताः । एवं मानवतासेवा मुख्यधारायाः केद्रम् अभवत् ।

एषा परम्परा पुनर्नवीकरणीया, दाढर्यं चापादनीया, सशक्ति विज्ञापनीया च । अन्तत इदमेव समीधीयते यत् राष्ट्ररूपेण अस्माकं विकासः तदैव सम्भवति यदा विवेच्यतेऽस्माभि दीनतमानां दलिततमानां अधःपतितानां च जीवनम् । वर्तमाने भारते बौद्धधर्मेण तारस्वरेण निनादिता तन्त्री, अथ च बाबासाहेब-अम्बेडकरस्य नेतृत्वे समाजे मुक्तेः अभ्युन्नतेश्च सशक्तं साधनमभवत् ।

बुद्धोपदिष्टैः शान्ति-अहिंसा-मानवेसम्मानभावनादिभिः अतिशयं प्रभाविताः अस्य शतकस्य उच्चनेतारः । बापू तु अहिंसादर्शनं नैतिकमूल्यरूपेण प्रावर्तयत येन अस्माभिः स्वातन्त्र्यमधिगतम् । फलस्वरूपेणैव पृथिव्याः विशालतमं साम्राज्यं भूमौ निपातितम् । पण्डितनेरूमहोदयोऽपि एतद्दर्शनं अन्ताराष्ट्रियक्षेत्रेषु प्रयुक्तवान् अथ च राष्ट्रं तन्नीतिं च प्रति लोके महतीं प्रतिष्ठाम् अर्जितवान् । स अस्माकीनां परराष्ट्रनीतिं पञ्चशीलाश्रितां कृतवान्, यतः शान्तिपूर्णसहास्तित्व-समता-

परस्पर सद्भाव-अनाक्रमण-आन्तरिकव्यवहारानाक्षेप-सिद्धान्तेषु राष्ट्रेषु परस्परव्यवहारनीतिः संस्थापिता । संयुक्तराष्ट्रसंघे च राष्ट्राणां सार्वभौमसमतायाः, विभिन्नसामाजिक-संरचना-आदर्श-संस्कृतिसत्त्वेऽपि परस्परसद्भावसहितप्रतिक्रियायाश्च सिद्धान्तो मान्यतां प्रापितः । समस्तसार्वभौमविषयान् प्रति तर्कस्य गुणस्य च मानदण्डः अस्माकम् अप्रतिबद्धतासिद्धान्तस्य मेरुदण्ड एव बभूव ।

सम्प्रति यदा वर्धमान एव परस्पराश्रयः, समस्तं विश्वं च भूमण्डलीयग्रामतां प्रापितः द्रुतसञ्चारमाध्यमैः, तदा अनिवार्यमिदं यद् वयम् स्वकीयोदात्तनीतिषु बद्धमूलाःस्याम, सुदृढाश्च भवेम स्वराष्ट्रस्य हितानां सुरक्षायाश्च संरक्षणसंवर्धनादिकृते । राष्ट्रीयाभ्युत्थानकरान् वर्तमानान् अन्यान् नवीन-वैज्ञानिक-आभियान्त्रिक-विकासान् प्रति ग्रहणशीलः सन् अस्मद्देशः दुर्बलकारितत्त्वान् प्रतिषेद्धुमपि सर्वथा समर्थः । सर्वस्मिन्नपि जगति अवश्यमेव रक्षणीयाः स्वकृत्यैः शान्ति-अहिंसा-निरस्त्रीकरण-प्रगतयः ।

भवादृशानां शिक्षणसंस्थानां विश्वविद्यालयानां च कृते एकं बुद्धानुशासनाङ्गम् अतीव महत्त्वपूर्णमस्ति तच्चास्ति श्रेष्ठातान्वेषणाय बलाधानम् । संघाख्यया संस्थया ऊर्जायाः गतिशीलतायाश्च तत्त्वं तत्कालीने मठीये विश्वविद्यालयीये च जीवने निक्षिप्तम् । अनेन अतिशयं प्रभावितम् पृथग्जनजीवनम् । न केवलम् आध्यात्मिके बौद्धिक वा क्षेत्रे अनया शिक्षापद्धत्या उच्चस्तरीयो मानदण्डो निर्धारितः, अपितु विविध कला-चित्र-स्थापत्य-साहित्य-चिकित्सा-अभियान्त्रिकी-निर्माण-स्थापत्येषु अपि । यथा उपदिष्टवान् भगवान् बुद्धः, धम्मपदे—

कयिरा चे कयिराथेनं
दल्हमेतं परक्कमे ।
सिथिलो हि परिब्बाजो
भिय्यो आकिरते रजं ।। धम्मपद २२ (५) ३१३ ।।

अजन्तामित्तिचित्राणां गुहावास्तुकलायाश्च सौन्दर्यम्, अत्र सांचीस्थले च स्तूपानां भव्यता, ल्हासानगरे पोतालाराजप्रासादस्य दिव्यत्वं मनोज्ञत्वं च सर्वमिदं पूर्णतां प्रति प्रयासं द्योतयति ।

मठीयशिक्षापद्धत्या समुद्भाविता: विश्वविख्याता नालन्दा-वलभी-विक्रमशिलासमा: विश्वविद्यालया: । चीनदेशीय-विद्वद्भ्याम्-हुयेन सांग-फाहियानाख्याभ्यां विस्तरेण वर्णित एतेषां विश्वविद्यालयानां महाप्रभाव: । विक्रमशिलाविश्वविद्यालयस्य अध्यक्षेण-अतिशोपध-दीपङ्करश्रीज्ञानेन बहुकृतं भोटदेशे बौद्धधर्मप्रचाराय, समर्थितञ्च भाषान्तरकर्म भोटभाषायाम् । एतेषु बहवो मूलतो नष्टा ग्रन्था भोटाभाषायाम् सुरक्षिता: विद्यन्ते ।

इदं अस्माकं सामूहिकं दायित्वं एतद्विव्यरिक्थसंरक्षणस्य । स्वीकीर्यै: छात्रै:, विद्वद्भि: प्राध्यापकैश्च सह इदं संस्थानं अस्मिन् भद्रकर्मणि व्यापृत: । अहं तु एवं मन्ये यद् भवन्त: एकस्य महाराजनीतिविशारदस्य विदुष:, समाजवादिन: बौद्धदर्शनेन अतीव प्रभावितस्य आचार्यनरेन्द्रदेवस्य परम्परां निर्वहन्ति । तस्य अतिप्रशंसिते ग्रन्थे बौद्धधर्मदर्शनाख्ये हिन्दीभाषया अतिसरल-सामान्यशब्दै: प्रायश: सर्व एव बौद्धविचारबिन्दवो निरूपिता: सन्ति । लोकसामान्ये बौद्धसिद्धान्तप्रचाराय अत्युपकरोति तेन फ्रेंचभाषातो भाषान्तरितो वसुबन्धुकृतोऽभिधर्मकोश: ।

अनेन संस्थानेन अपि प्रज्ञा-ज्ञानाश्रयान् प्राचीनबौद्धग्रन्थान् अधिकृत्य महत्त्वपूर्णा: शोधा: क्रियन्ते, प्रशंसिता भवतां भोटभाषातोऽनूदिता ग्रन्था अस्माकं भाषया ।

प्रसन्नताया: विषयोऽयं मत्कृते यत् भोटसंस्कृते: बौद्धविचाराणां च संरक्षणाय अमूल्यं अवदानं निष्पाद्यते । भोटायुर्वेदज्यौतिषयो: पाठ्यक्रमारम्भेण भोट-कला-हस्तकला-संग्रहालयस्थापनेन च अस्या: प्राचीनपरम्पराया: दीर्घजीवित्वम् संभाव्यते ।

एकं विशिष्टं क्षेत्रं प्रति अहं भवताम् उत्साहवर्धनं कर्तुकामोऽस्मि यद् भवद्भि: बौद्धधर्मस्य सर्वसामान्यानां रहस्यविद्यानां च उभयेषामपि अवबोधप्रयाससंवर्धनाय यत्न: करणीय: । बुद्धदेशनाया: रहस्यात्मक: पक्षो भोटबौद्धधर्मस्य महत्त्वपूर्णमङ्गम् वर्तते, तदपेक्षते व्याख्यानं भाषान्तरणं च विविधभाषासु लोकहिताय सरलभाषयैव । बहुषु देशेषु

बौद्धसिद्धान्तानां विवेच्यवस्तु-प्रयोग-अधिमादिकृते बौद्धदर्शनग्रन्थानां व्याख्यारचनापि बहूपकरिष्यति ।

विरामात् पूर्वम् अहम् बलपूर्वकं बुद्धस्य तं सन्देशं प्रस्तोतुकामोऽस्मि यं बापू नवम्बरमासस्य चतुर्विंशतितमे दिने वामरलोचनाङ्कचन्द्रमिते खीष्टीये वर्षे 'यङ्ग इण्डिया' नाम्नि पत्रिकायां व्यलिखत्—

''बुद्धोपदेशः तद्हृदयमिव सर्वव्यापि सर्वग्राहि च, अतस्त्रच्छरीरम् अद्यापि वरीवर्तते सर्वं पृथिवीतलं च प्रभावयति ।''

अशोकसन्देशहरा गर्जन्तः सारनाथीया सिंहा इव बुद्धदूता भवन्तो निवेद्यन्ते मया भगवतो बुद्धस्य बहुजनहिताय बहुजनसुखाय इत्यस्य, शान्तेः सौमनस्यस्य, प्रतिजनं प्रतिराष्ट्रं च भ्रातृत्वस्य संदेशप्रचाराय ।

अतिविनीतभावेन स्वीक्रियते मया स समादरो योऽद्य भवद्भिर्मह्यं उपायनीकृतः ।

—*—

संस्कृतस्य सार्वभौमत्वम्

डॉ0 मुरलीमनोहरजोशी

अद्य प्रभातस्य गौरवास्पदे वातावरणे भवद्भिः सह समुपस्थाय महान्तमानन्दमनुभवामि। मया स्वजीवनस्य विशिष्टः कालः गङ्गा-यमुना-सरस्वतीनां सङ्गमे त्रिवेणीति तटे संस्थिते प्रयागविश्वविद्यालये यापितः। संस्कृतभाषायां गङ्गा 'देवसरिद्' वा सुरसरिद् वा (अर्थात् देवानां नदी) इति प्रोच्यते। इयं कर्मणां विचाराणां च पावनत्वं ख्यापयति, इयं च अवनितले भगीरथेन महता तपसा समानीता। यमुना चान्या दिव्यसरित् वर्तते या सूर्यतनया यमभगिनी च प्रोच्यते। सरस्वती च अदृश्या दिव्यप्रवाहरूपा यस्याः समुल्लेखः वेदेषु प्राचीनग्रन्थेषु प्रायशः प्राप्यते। इदमेव कारणं यदहं विश्वविद्यालयस्य वातावरणे निवासमभिलषामि। यदा च मया सिल्पाकोनविश्वविद्यालयस्य अध्यक्षमहोदयस्य निमन्त्रणमासादितं तदा सहर्षं तत्स्वीकृतम्, तत्र कारणद्वयमस्ति। प्रथमम्, सम्मेलनस्य दक्षिणपूर्व-एशियादेशेषु संस्कृतम्--संस्कृतिसमन्वस्योपादानम्-- इति विषयो ममाभिरुचिपूर्णो वर्तमानसन्दर्भे प्रासङ्गिकश्च वर्तते। द्वितीयम्, समग्र- दक्षिणपूर्व-एशियादेशैः विशेषतः थाइलैण्डदेशस्य सिल्पाकोनविश्वविद्यालयेन प्रवर्तितं संस्कृतप्रचारप्रसारकार्यममहं सम्यग् अवगच्छामि। अहं विश्वसिमि यत् संस्कृतमेव अस्माकं समानसंस्कृतेर्मूलं पारम्परिको दायश्च विद्यते। इयं भाषा न केवलं ज्ञानं संवर्धयितुम् अपितु मानवीयचेतनामपि परिष्कर्तुं क्षमते।

विगतमास एव देहल्यामस्माभिः एकं विश्वसंस्कृतसम्मेलनं

समायोजितम्, यस्मिन् प्रभूतसंख्यया वैदेशिका अपि विद्वासः प्रतिभागिनः आसन्। जर्मनी- जापान- कनाडा- थाइलैण्ड- हङ्गरी- इण्डोनेशिया- पोलैण्ड- क्रोएशिया- फ्रांस- इटली- प्रभृतिदेशेभ्यः समागताः विद्वांसः स्व-स्व-शोधनिबन्धं पठितवन्तः। सम्मेलने सम्मिलितविषयाणां सुविस्तृतिः निश्चयेन आश्चर्यमाविर्भावयति। तया विश्वस्मिन् विश्वे संस्कृतं प्रति विद्यमानायाः रुचेः सम्प्रत्ययो भवति। यतो हि मयाऽवगतं यत् विश्वस्य महत्त्वशालिविश्वविद्यालयेषु संस्कृतशिक्षणविभागाः पीठानि वा सन्ति। सुहृद्भिश्च बोधितोऽहं यत् संस्कृतविकासाय थाईलैण्डदेशेन अन्येभ्यो देशेभ्योऽपेक्षया समधिकं कार्यं विहितमस्ति। सिल्पाकोनविश्वविद्यालये संस्कृतविभागस्य प्रारम्भः षट्चत्वारिंशवर्षेभ्यः प्राक् सञ्जातः। आशासे यत् देशस्य अन्येष्वपि विश्वविद्यालयेषु संस्कृतस्य पालेश्चाध्ययनं समनुष्ठीयते।

प्रश्नोऽयमुत्तिष्ठति यत् संस्कृतं अस्मभ्यं कथम् इयदमूल्यम्? प्रथमतः विलियमजोंसमहोदयेनाधिगतं यत्- "ग्रीकतः अधिकं शुद्धं लैटिनतः अधिकं समृद्धम्, उभाभ्याञ्च अधिकं परिष्कृतं संस्कृतम्" इति अथवा श्रीमतः अरविन्दस्य मन्तव्यानुसारेण "संस्कृतं विचाराभिव्यक्तेः अपूर्वं परिष्कृतं समर्थं च साधनं, अस्मिन् स्पष्टता, सुबोधता, चरमसम्भावना शुद्धता चास्ति। इदं सर्वदैव सुघटितपदविन्यासं सूक्तिनिर्माणक्षमं सौन्दर्यसमृद्धिसम्पन्नम्, अपरञ्च प्राचीनकालादेव ध्वनेः शैल्याश्च वैभवशालिपरम्पराणां वाहकं वरीवर्त्यते।" अथ सम्भवतस्ततोऽपि महत्त्वपूर्णः पक्षः अयमेवास्ति यद् इयमेव एका एवंविधा भाषाऽस्ति यस्यां निरन्तरं चैतन्यसम्बद्धं विषयमधिकृत्य लेखनं प्रवर्तते। अनादिकालात् ऋषिभिः यदा वेदानां साक्षात्कारः कृतः तदा प्रभृति चेतनासम्बद्धं अपरिमेयं चिन्तनम् अनुभूतीनां बहुविधाः प्रकाराश्च समुल्लिखिताः सन्ति। येषाम् अध्ययनम् अग्रे शोधार्थिभिर्विधेयम्। परिणामतः सर्वेषु अन्तःशास्त्रियाध्ययनेषु प्रवर्धकः परिणामो भविष्यति। असंशयं च तेन संस्कृतं पुनरपि विश्वस्य प्रमुखभाषा भविष्यति। दर्शन-साहित्य-क्षेत्रेषु एवंविधाः सङ्केताः पूर्वकालादेव प्राप्यन्ते, तत्र शॉपेनहावरमहोदयाः आल्डस-हक्सलेमहाशया इमर्सनमहोदयाश्च

उपनिषदां माहात्म्यं विदित्वा ततो यच्चेतनायाः सर्वोत्कृष्टं ज्ञानं विद्यते तत् ज्ञातवन्तः। शॉपेनहावरमहोदयेनोक्तं यत् "सम्पूर्णेऽपि संसारे उपनिषद्भिस्तुल्यं तत्समं लाभकरम् उत्कर्षविधायकं च चिन्तनं कुत्रापि नास्ति। इमाश्च मम जीवने शान्तेः समुन्नतेश्च विधायिकाः मम निर्वाणस्य चापि साधिका भविष्यन्ति" इति।

इमर्सनमहाशयः स्वोपनिबद्धे ब्रह्मनामके काव्ये औपनिषदं सारं समभिव्यञ्जयन् उक्तवान् "अशिवसन्देहास्ते माम् अत्यजन्। तेषामुड्डयने अहमेव पक्षः. अहमेव सन्देहकर्ता सन्देहश्च, अहमेव तद् गीतं यद् ब्राह्मणैः गीयते।" इति।

अत्र समुल्लेखोऽयम् अप्रासङ्गिको नास्ति यत् एकोनविंशतिशततमे विंशतिशततमे च ख्रिष्टाब्दे संस्कृतनिधेः परिप्रकाशनाय पाश्चात्त्यविद्वद्भिः विहितं योगदानं सुतरां प्रशंसनीयमिति। किन्तु पाश्चात्त्यानि भाषान्तराणि कञ्चिद् अवधिं यावत् संस्कृतग्रन्थानां अर्थं तात्पर्यं वा विरूपितवन्तः। अत इदं परमावश्यकं यद् ये खलु कलायाः विज्ञानस्य साहित्यस्य अध्यात्मस्य दर्शनस्य तलस्पर्शि ज्ञानमभिलषन्ति ते संस्कृतपरिज्ञाने मौलिकज्ञाने च यत्नं विदध्युः। संस्कृतं केवलं शास्त्रियभाषेति सर्वथा असङ्गतो विचारः। ऐतिहासिकभीषणाघातैर्घातिता दुर्योगैश्चाक्रान्ता सत्यपीयं भाषा समुत्कृष्टां मेधां वर्तमानकालेन संयुनक्ति। मानवस्य परिकल्पनां यावद् अस्यां भाषायाम् अध्ययनं लेखनं च प्रसक्तं वर्तते।

संस्कृतं न केवलं दक्षिण-पूर्व-एशिया-देशानां कृते अपितु चीन-जापान-प्रभृतीनां विस्तृत-एशिया-देशानां परिदृश्यपरिमण्डले संस्कृतेः धर्मस्य दर्शनस्य च सम्प्रतिपत्तये अपरिहार्यमेव। युगेभ्यः मानवचेतनायै मानवकल्याणाय च संस्कृतस्य महदवदानम् अस्ति। तत् प्रीतेः शान्तेः सङ्गतेश्च सङ्केतचिह्नम्, समवायोपयोज्यं सुमधुरं फलं व्यक्तिगतसमुपलब्धेः, संस्कृते विहितं पर्यावरणस्याभिनन्दनं शान्त्यै समभिवन्दनं च मानवतायाः कृते नैव केवलम् अपितु निखिलस्य ब्रह्माण्डस्य कृते विद्यते। अग्रे अहं संस्कृतं मानवतायै किं विदधातुं शक्नोतीति विषये स्वाभिमतं भवद्भिः विमर्ष्टुं प्रयतिष्ये। यतो हि मम

मतौ ज्ञानं दर्शनं च भौगोलिकसीमभिः नास्ति परिच्छिन्नं, यतो हि एतेषां प्रसारः व्यापको भवति तेषाञ्चोद्देश्यम् उच्चतरमूल्यानाम् सम्प्राप्तये मानवजातेश्च मुक्तये भवति इत्यहं प्रत्येमि।

संस्कृतं दक्षिण-एशिया-देशेषु संस्कृतीनां समन्वयने न केवलं उपादानत्वेन प्रतिष्ठितमस्ति अपितु अत्र अस्याः भाषायाः व्यापकः प्रसारोऽप्यस्ति। यूरोप-एशिया-देशेषु हङ्गरी- रूस- क्रोएशिया- लिथुआनिया- भारत- म्याँमार- थाईलैण्ड- कम्बोडिया- इण्डोनेशिया- प्रभृतिषु संस्कृतस्य प्रभावः परिलक्ष्यते। नातिचिरं लिथुआनियादेशस्य राष्ट्रपतिभिः सह मम मेलनं जातम्। तैरुक्तं यत् तेषां देशे संस्कृतस्य बहु महत्त्वं वर्तते। लिथुआनियादेशो भारतेन सह सम्भूय संस्कृतस्य समुन्नतये कार्यं कर्तुमभिलषति। सङ्गीतस्य लये, स्वरे, नृत्यभङ्गिमायां बैलेप्रभृतिकलासु संस्कृतस्य प्रभूतः प्रभावः परिलक्ष्यते। अनेकाभिः शताब्दीभिः वयं रामायणस्य महाभारतस्य च कथानां आस्वादनं कुर्मः, ताभ्यः प्रेरणामपि प्राप्नुमः। विश्वसिमि यत् आयतौ अपि अस्याः चारुपरम्परायाः संरक्षणं विधास्यामः।

संसारस्य विद्वांसः साम्प्रतं तथ्यमिदं स्वीकुर्वन्ति यत् संस्कृतभाषा वैज्ञानिकी भाषाऽस्ति। सार्धद्विसहस्रवर्षेभ्यः प्राक् महर्षिपाणिनिः अष्टाध्यायीं प्रणीय संस्कृतं सुव्यवस्थितं विहितवान्। अद्यापि ग्रन्थोऽयं सम्पूर्णेऽस्मिन् संसारे पठ्यते। संस्कृतं सङ्गणकयन्त्रस्य कृते सर्वोत्तमा उपयोगिनी भाषा मन्यते। अस्माकं देशे अस्यां दिशि अनल्पं कार्यं विधीयते। वयं सर्वे सम्भूय एतत् कार्यं अग्रे सारयितुं शक्नुमः।

नाहमत्र समुपस्थापयामि दक्षिण-एशियानिवासिभिः सह अस्माकं वाणिज्य-व्यापारगतं ततोऽप्यधिकं वा महत्त्वपूर्णं दार्शनिकम् आध्यात्मिकं च दीर्घमैतिहासिकं सम्बन्धं संवादञ्च पुरातनम्। सुवर्णभूमिदेशेभ्यः अथवा निखिलदक्षिणपूर्वदेशेभ्यः अस्माकं सम्बन्धो न्यूनातिन्यूनं चतुःपञ्चसहस्रेभ्यः वर्षेभ्यः पुरातनोऽस्ति। स्पष्टतः संवादोऽयं बौद्धभिक्षुकाणां सुदूरपूर्वस्यां दिशि यात्राप्रसङ्गेन सुतरां वर्धितः। ममाभिमतं यत् तदानीं बहवो धर्मतत्त्वजिज्ञासवः इतोऽपि अध्ययनार्थं

भारते सुप्रतिष्ठितं नालन्दाविश्वविद्यालयं विक्रमशिलाविश्वविद्यालयं चागच्छन्। मयाऽवगतं यत् वियतनामदेशस्य वो-कान-स्थले ख्रीष्टीयतृतीयशताब्द्याः शिलालेखः समधिगतः, येनावगम्यते यत् तस्मिन् काले राजकार्यसम्पादिका भाषा संस्कृतमेवासीद् इति। प्राचीनकम्बोडियादेशे ख्रीष्टीयषष्ठशतकस्य समधिगतेन शिलालेखेन अवगम्यते यत् रामायणं महाभारतं पुराणानि च एकस्मै देवालयाय प्रदत्तान्यासन् यत्र तेषां नित्यं पाठोऽप्यासीत् प्रवर्तितः।

इतिहासे वयं द्वारावत्याः समुल्लेखं लभामहे। एतदेव क्षेत्रम् आधुनिकथाईलैण्डरूपेणास्ति प्रतिष्ठितम्, अस्य क्षेत्रस्य महाभारतेन कृष्णेन च सम्बन्धः आसीत् इत्यपि अवगम्यते। दक्षिणभारतात् समागत्य अस्मद्देशीयाः केचन अत्रैव निवासं चक्रुरित्यपि मन्यते। ख्रीष्टीयपञ्चमशतकात् अष्टमशतकं यावत्काले अत्र मुख्यतः पालिरेव व्यवहारभाषा आसीत्। यतो हि आधारभूता बौद्धधर्मग्रन्था अस्यामेव भाषायाम् आसन्। द्वारावतीसमकालिकस्य श्रीविजयसाम्राज्यस्य विस्तारः इदानीं दक्षिणथाईलैण्डदेशस्य नगररूपेण संस्थितं चयानगरं यावदासीत्, तत्र च जनव्यवहारभाषा संस्कृतमेवासीत्। प्रतिवेशिनि कम्बोडियादेशे ख्रीष्टीयैकादशद्वादशशताब्द्योः संस्कृतमेव मुख्यभाषापदमध्यास्त। राजवंशस्य परिवर्तनेन अभिनवविचारा आविर्भूताः। सुखोदयसाम्राज्यस्य रामखामहेङ्ग इत्याख्यस्य तृतीयस्य राज्ञः शासनकाले थाईलैण्डदेशस्य दक्षिणक्षेत्रं श्रीलङ्कातः बौद्धधर्मः प्राविशत्। यत्र ततः प्रभृति धार्मिकक्रियाकलापस्य भाषा पालिर्वर्तते। सर्वोत्तमं तथ्यमिदमस्ति यदत्र संस्कृतस्य थाईकरणमभवत्, एतत् थाईभाषायाः अभिन्नाङ्गत्वेन प्रतिष्ठितं जातम्। संस्कृत-पालि-थाई- भाषा- त्रिवेणी मया प्राक् प्रतिपादितया प्रयागस्य त्रिवेण्या सह साम्यं भजते।

पालेरध्ययनस्य आवश्यकतायाः प्रयोजनमपि किञ्चिद् प्रकाशयितुम् अपेक्षितमस्ति यतो हि इयमेव भाषा विस्तृतबौद्धज्ञानविज्ञानस्य प्रवेशद्वारमास्ते। भगवतो बुद्धस्योपदेशानां प्रचारः सुविस्तृत- दक्षिण- पूर्व- एशिया- तिब्बत- चीन- जापान- मङ्गोलिया- इण्डोनेशिया- प्रभृतिषु देशेषु अभूत्। तेषामुपदेशानां प्रभावः

न केवलं प्राच्याम्, अपितु प्रतीच्यामपि दिशि सञ्जातः। भगवतो बुद्धस्य सर्वातिशायि योगदानं मज्झिमनिकाय-(मध्यममार्ग)-रूपेणास्ति इति प्रथितम्, यत्र सम्यग् विचारः, सम्यग् आकाङ्क्षा, सम्यग् वाणी, सम्यग् आचरणम्, सम्यग् जीवनयापनम्, सम्यक् चेतना, यम्यक् चिन्तनं च विलसन्ति। थाईलैण्डदेशे पालेः अध्ययनस्य समृद्धिशालिनी परम्परा विराजते इति प्रमोदस्थानम्।

षष्ठो राजा रामः सुप्रथितानाम् अभिज्ञानशाकुन्तल- सावित्री- प्रियदर्शिका- नलोपाख्यान- प्रभृतीनां ग्रन्थानां थाईभाषान्तराणि कारयित्वा अस्मिने देशे संस्कृतसाहित्यस्याध्ययने महत्त्वपूर्णं योगदानं विहितवान्। तथैव अयं थाईरामकियन् इत्यमुं प्रबन्धं रामकीर्तेरुद्भवं विष्णोः दशावतारञ्चाधृत्य प्रबन्धान् शोधनिबन्धांश्च लिखितवान्। अस्मिन् क्षेत्रे अयं हि खलु महान् संस्कृतदायः। अत्र समेत्य अत्रत्यायाः भाषायाः संस्कृतेन सह ध्वन्यात्मकं साम्यमवलोक्य जनाः आश्चर्यचकिताः भवन्ति। अल्पीयसा संस्कृतज्ञेनापि जना अत्र आत्मीयतामनुभवन्ति।

अस्माकं समक्षं सर्वाधिकं महत्त्वपूर्णः प्रश्नोऽयमायाति यद् अधुना संस्कृताध्ययनस्य किं प्रयोजनम्? वयं सर्वे जानीमो यत् संस्कृतं खलु अध्यात्मविद्यायाः (पराविद्यायाः) लोकविद्यायाः (अपराविद्यायाः) च भाण्डागारः। संस्कृतं नाम ज्ञानोद्दीपितमानवमस्तिष्कस्य आविष्करणम्। नेदं परिसीमितं न वा सम्बद्धं केषुचित् राजनैतिकंधार्मिकक्षेत्रेषु। "सा विद्या या विमुक्तये" इति वैदिकोपदेशेन ज्ञानस्य आभिमुख्यं प्रथितं विद्यते। इयं हि जीवने समुत्कर्षं विदधातुं , अज्ञानान्धकारात् दूरीकर्तुम्, ज्ञानालोकं प्रति प्रवर्तयितुं च प्रभवति। इतोऽप्यधिकं महत्त्वपूर्णं यद् इयं धर्म इत्याख्यया विख्यातानां मूल्यानां व्यवस्थां विवृणोति। अत्र धर्मशब्दो नास्ति सङ्कुचितेऽर्थे मतान्धताशये, आङ्ग्लभाषाया 'रिलीजन' इत्यर्थे वा। अत्र धर्मशब्दः परमोत्कृष्टजीवनपद्धतिमेव प्रदर्शयति।

पुनः प्रकृतमनुसरामः। संस्कृतमस्माकं ज्ञानस्य मूलं स्रोत इति। भारतीयदार्शनिकसिद्धान्तानाम् अन्तर्वर्तिनी धारा ब्रह्मसूत्र- उपनिषद्- गीतेत्येषां त्रयाणां ग्रन्थानां सुविदितां प्रस्थानत्रयीमाश्रयते। ज्ञानस्यानुपमो निधिः श्रीमद्भगवद्गीता उपर्युक्तेष्वन्यतमः, विश्वसाहित्ये समुपलब्धेषु

ग्रन्थेषु अतिशयेन पठ्यते।

संसारे कोटि- कोटि- परिमिताः जना भगवद्गीताम् अनुशासकं ग्रन्थं मत्वा अनुशीलयन्ति। प्रायः शताब्दात् पूर्वं प्रतीचीं प्रति स्वकीये प्रथमे यात्राप्रसङ्गे श्रीविवेकानन्दस्वामिभिः शिकागोनगरे प्रवर्तितायां धर्मसंसदि वेदान्तस्य भगवद्गीतायाश्च उपदेशः पाश्चात्त्येषु प्रचारितः, सहस्राधिकाश्च जना अस्माद् ग्रन्थाद् शान्तिम् अध्यगच्छन्। महात्मगान्धिना स्वजीवनं भगवद्गीतायाः सदुपदेशान् आधृत्य यापितम्। उक्तं च तेन --"अहं श्रीमद्भगवद्गीतायां शान्तिमधिगच्छामि, तां च शान्तिं 'सरमन ऑन दि माउण्ट' इत्यनेनापि न लभे। यदाऽहं निराशान्धकूपे भवामि, प्रकाशरश्मिरपि नावलोक्यते, तदाऽहं भगवद्गीतायाः शरणं व्रजामि। कमपि एकं श्लोकम् अवलोकयामि। तदनन्तरमेव कष्टानां मध्येऽपि तिष्ठन् विहसामि। मम जीवनं बाह्यदुःखैः परिपूर्णमस्ति, तथापि यदि तेषाम् नास्ति कश्चन प्रत्यक्षः प्रभावः सङ्केतो वा तदहं भगवद्गीतायाः सदुपदेशानां प्रभावमेव मन्ये।"

वयं सर्वे स्व-स्व-स्थाने जीवनसङ्घर्षरूपिणं कुरुक्षेत्रमनुभवन्तः अर्जुना एव। वयं कुण्ठाग्रस्ताः निराशान्विताः कर्तव्यमूढाः सन्तः यदा कदा स्वकार्यं त्यक्तुमपि सन्नद्धा भवामः। ये खलु भगवद्गीतायाः अध्ययनशीलाः सन्ति ते सद्यः अध्यवस्यन्ति यत् कर्तव्यमार्गे दैन्यं पलायनं च नास्तः। भगवति श्रद्दधानः फलनिरपेक्षभावनया कर्मणि अभिरतो जनो भवेद् इति ते जानन्ति। जीवनप्रवाहे वयं सर्वे सदैव कर्मणि संस्थिता भवामः। एतदवधेयं यत् कर्मणः बन्धनगुणाः तत्सम्पादिकायां कामनायां प्रयोजने वा सन्निहितास्तिष्ठन्ति। अतः कर्मसम्पादनात् पूर्वं विद्यमाना मनोदशा विशिष्टा भवति। अत एव गीता निष्कामकर्ममार्गम् उपदिशति, न तु कर्मरहितं मार्गम्। कर्मणि एव अस्माकं अधिकारः न पुनः कर्मफले, यतो हि सिद्धिः असिद्धिर्वा नह्येकस्मिन् जने। साफल्यम्, असाफल्यं च समभावेन ग्राह्यम्। एतदपि महत्त्वपूर्णं यद् अस्माभिर्न कदापि अकर्मविषये चिन्ता कार्या। मनसः प्रकृतिरियं यत् साफल्ये सति मनः उत्फुल्लं भवति असाफल्ये च सति तद् उद्विग्नं भवति। किन्तु उभयथा अप्रभावितं मनः स्पष्टतां दृढतां च धारयति। परमहंसरामकृष्णस्य एका नीतिकथा अतीव

प्रसिद्धास्ति। तेनोक्तम्-

> "अस्मिन् संसारे धनिकस्य परिचारिका इव भव। सा स्वामिनः सन्ततेः सम्पत्तेश्च विषये एवं व्यवहरति, येन प्रतीयते यत् एतत् सर्वं तस्या एव, किन्तु सा हृदयेन जानाति यत् न किमपि तस्याः। यथा सा परिचारिका स्वस्वामिनः सम्पत्तेः स्वकल्पिताधिकारं मुहूर्तेनैव त्यक्तुमर्हति तद्वत् सांसारिकवस्तूनां परित्यागाय सन्नद्धो भव।"

मूलगीतायाः अध्ययनाय संस्कृतं यैः अभ्यस्तं तादृशाः जनाः बहवः मिलन्ति। प्रत्येकं भाषा स्वकीयं किमपि वैलक्षण्यं धारयति यद् अन्यया भाषया पुनः प्रस्तोतुं न शक्यते। संस्कृते प्रेरणाया महती क्षमता विराजते, किन्तु तत्र विराजते काचित् सुनिश्चिता विचारसरणिः, या खलु पाश्चात्त्यचिन्तने तिरोहिता, तिरोहिता च पाश्चात्त्यभाषासु।

साम्प्रतं वयं महत्परिवर्तनेए प्रवर्तामहे। परिवर्तनस्यायं झञ्झावातः अतीव वेगवान् वर्तते येन पदसंस्थितौ काठिन्यमनुभूयते। अहम् आर्थिकभूमण्डलीकरणविषये व्याहरामि। विज्ञानप्रौद्योगिक्योः क्षेत्रे समधिगता समुपलब्धिः प्रत्येकं देशं परिवर्तनाय आह्वयति। वयं पूर्णतः समाकृष्टा नवीनेऽस्मिन् युगे यश्च युगः अस्मासु प्रत्येकं प्रभावयितुं तत्परोऽस्ति। जगति धनिक-निर्धनयोः विभाजनं सुस्पष्टमेव। विश्वबैङ्कनिदेशानुसारेण त्रिनवत्युत्तरैकोनविंशतिशततमे वर्षे निर्गतेन विश्वबैङ्कनिर्देशेन ज्ञायते विश्वस्मिन् विश्वे प्रायः त्रिंशतं कोटिजनानां (३-बिलियन्-जनानां) प्रतिदिनम् आयः द्विडॉलरमुद्राभ्यामपि न्यून आसीत्। षड् शतं कोटि जनेषु (६ बिलियन्-जनेषु) सार्धैकशतं कोटिजनानां जीवनं घोरनिर्धनतायाम् एव भविष्यतीति पूर्वकथनं विद्यते। अष्टकोटिजनाः प्रतिदिनं क्षुधापीडिताः शेरते। विश्वस्तरे अधिकतमम् आयं निर्वहतां देशानां विश्वस्य विंशतिप्रतिशतं (२०%) जनाः समग्रविश्वस्य उपभोगव्ययस्य षडशीतिः प्रतिशतम् (८६%) उपभुञ्जते। निर्धनतमस्य जनस्य उपभोगे काऽपि वृद्धिर्न दृश्यते। इदं पाश्चात्त्यशोषणात्मकप्रविधेः

त्रुटिपूर्णचिन्तनस्य च फलम्। एतन्नितरामसम्भवं यद् विश्वमिदम् उपभोगस्य पाश्चात्त्यश्रेणीं प्राप्नुयात्। पाश्चात्त्योपभोगवादेन पर्यावरणं विनष्टं, नद्यः सागराश्च दूषिताः, वनसम्पदो विनष्टाः, निर्धनदेशाश्च शोषिताः, येन सामुद्रिकं जीवनम्, अन्तरिक्षम्, जलप्रपाताः, नद्यः, ध्रुवप्रदेशाश्च सर्वे स्वस्वास्तित्वे विपन्नाः। अतः चिन्तनशीला वयम् उपभोगप्रतिमानमिदमाकलय्य चिन्तिताः। साकल्येन विश्वस्य धनिकानां जीवनशैल्याः पुनः परीक्षणमपेक्षितम् अस्ति। अस्माभिः पारिस्थितिकीम् आश्रित्य उपभोगं प्रति उत्पादनं च प्रति सार्वभौमिक- क्षेत्रीय- राष्ट्रिय- स्थानीय- प्रतिबन्धानां स्पष्टीकरणम् पालनं च आवश्यकतया विधेयम्। प्रकृतेः स्वरूपस्य पर्यावरणसमस्यायाश्च सामाजिक- जनसाङ्ख्यिक- आर्थिक- सांस्कृतिक- पृष्ठभूमिमाश्रित्य स्वरूपपरिशीलनं नितान्तम् आवश्यकम्।

नाहमत्र शोषणात्मकयान्त्रिकप्रविधीनां सामाजिकपद्धतेः वैज्ञानिकपक्षान् कारणानि वा विमृशामि। अयं स्पष्टतः पाश्चात्त्यमनीषया परिगृहीतमार्गस्यैव दुष्परिणामः। अतोऽस्माभिः सर्वप्रथमम् अस्माकं प्राच्यमूल्यव्यवस्था अवगन्तव्या, अवगन्तव्यश्च संस्कृतसाहित्ये दर्शने च विद्यमानो दार्शनिक आधारः। अस्माकं परम्परायां पृथिवी प्रकृतिश्च उभे अपि पवित्रे स्तः। अहम् अथर्ववेदस्थभूमिसूक्तस्य आदिमं मन्त्रं श्रावयितुमभिलषामि। इमे चारुशब्दाः पृथिवीं प्रति पूज्यभावनां प्रेरयन्ति-

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।
असम्बाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः।।
यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः सम्बभूवुः।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु।।

(अथर्ववेदे, १२।१।१-४)

प्राच्यपरम्परायाम् उपभोगः जीवनशैल्याः सरलतमदृष्ट्या निरुद्धोऽस्ति। धनिकाः देशाः जनाश्च सर्वदैव संसाधनानि स्वायत्तीकृत्य अनुक्षणम् अधिकमधिगन्तुम् कामयन्ते, फलतस्ते स्वशान्तिं प्रसन्नतां च

परित्यजन्ति। सम्पूर्णेऽपि पाश्चात्त्यजगति परिवारः विशृङ्खलितो भवति, बहवः मानसिक्या अशान्त्या पीडिताः जनाः शान्तिं न लभन्ते। अस्यां स्थितौ पुनः अस्माकं ज्ञानस्रोतः अवलम्बनीयम्, अवगन्तव्यं च यत् शान्तेः प्रसन्नतायाश्च अधिगमः कामनापूर्त्या नैव सम्भवः। त एव शान्तिमधिगच्छन्ति येषां कामनाः सागरे निमग्नायाः नद्यास्तरङ्गा इव उपशमिता भवन्ति। यदि वयं अनूचानानां वचनं शृणुमः तर्हि जानीमो यद् उपभोगेन शान्तिर्नैव लभ्यते। यतो हि यथा यथा कामनायाः पूर्तिर्विधीयते तथा तथा तासां तीव्रता तथैव वरीवर्धते यथा हविः प्रदाने अग्नेः तीव्रता जायते। प्रोक्तं च अस्ति-

न जातु कामः कामानामपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।।

नायं पौराणिकः सन्देशः अपितु तीर्थङ्करमहावीरेण भगवता बुद्धेन अन्यैरपि ऋषिभिः मुनिभिश्च एवमेव समुपदिष्टम्। अस्मिन् प्रसङ्गे एका कथा मया स्मर्यते-

एकदा कश्चित् पुरुषो जलाशये स्नानं कुर्वन्नासीत्। होरां यावत् बारं बारं जले निमज्य बहिरागतः। गृहं प्रति गन्तुकामेन तेन एको घटः जलेन पूरितः। तं घटम् असौ अधिस्कन्धं संस्थाप्य गृहं प्रति चलितुं प्रवृत्तः। तस्य गृहम् आसीत् दूरम्। मार्गे स क्लान्तो जातः। सोऽचिन्तयत् यत् यदाऽहं जले निमग्न आसम्, तदा प्रचुरं जलं मम शिरशः उपरि आसीत्, किन्तु मया तस्य भारो नानुभूतः। घटेऽस्मिन् स्वल्पं जलं वर्तते, न ततोऽधिकम्। तथापि तस्य भारः कियान् अधिकः। कथमेतत्?

एवमेव यदा सम्पत्तिः केषुचित् हस्तेषु नियमिता भवति, तदा मानसिकचिन्ताम् उत्पादयति, गुरुत्वं च अनुभावयति। यदा सा सम्पत्तिः वितरिता भवति तदानीं वातावरणं चिन्ताविमुक्तं भारहीनं गुरुत्वानुभवरहितं च जायते। अस्मादेव कारणात् भगवता महावीरेण उक्तं यत्-- सम्पदः स्वामित्वेन मानवः भारमनुभवति, तत्त्यागेन च लघुभारमात्मानं मनुते।

मानवः सुखं याचते, मानवस्य प्रकृतिरेषा, किन्तु बहुधा जनाः सुखस्य स्वरूपे भ्रान्ताः भवन्ति, व्यक्तौ चेतना जडता च सहैव निवसतः।

चेतना सदैव परमसत्तायां श्रद्दधते। या जडता, सा माया इत्यपि अभिधीयते। सा विदधाति सदैव संसारोन्मुखताम्। मानवो यदा मायाप्रभावेन प्रभावितो भवति तदा तस्य प्रवृत्तिः संसारे भवति। एतदवधेयं यत् सांसारिककामनायाः पूर्तिः सांसारिककर्मभिर्भवति, किन्तु परमसत्तायाः प्राप्तिः सांसारिककर्माधीना नास्ति। परमसत्तायाः प्राप्तिः तीव्रपिपासामेव अपेक्षते। प्रोक्तं च-

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्य-
नश्नन्यो अभिचाकषीति।।

एकस्मिन् वृक्षे द्वौ परमसुन्दरौ पक्षिणौ स्तः। तौ समानौ तथापि भिन्नौ स्तः, तयोरेकः वृक्षस्य फलं भुङ्क्ते, अन्यश्च साक्षी भवति फलं च न भुङ्क्ते। इमे वृक्षादयः संसारे विद्यमानानां जड-जीव-परमात्मनां प्रतीकभूताः सन्ति।

यदि वयं स्वकीयज्ञानस्य मूलं स्रोतः विमृशामः तदा वैश्वीकरणस्यास्य भारं झञ्झावातं च सोढुं सामर्थ्यशालिनो भवामः। अस्माभिः अस्मद्देशानुरूपम् अस्मज्जनानुरूपं च आर्थिकवैश्वीकरणमेतद् विधातुं प्रयतितम्। आत्मानं प्रकाशयितुं संस्कृतभाषाया विपुलं साहित्यं विद्यते। आत्मनः सत्त्वमभिवर्धितव्यं यच्च अस्माकं स्वभावानुरूपं परम्परानुरूपं भवेत्। अथर्ववेदस्यायं सन्देशः भावनीयः-

समेत विश्वे वचसा पतिं दिवः
एको विभुरतिथिर्जनानाम्।
स पूर्व्यो नूतनमाविवासत्तं
वर्तनिरनु वावृत एकमित् पुरु।।

(अथर्ववेदे ७।२१।२)

संसारस्य सर्वे मानवाः सम्भूय ईश्वरं प्रार्थयेरन्। परमात्मा एव संसारस्य सुहृद् वर्तते। स प्राचीनेषु प्राचीनः सन्नपि नूतनतायां निवसति। सर्वेषाम् धर्माणां मार्गाः अन्ततः तस्मिन् एव निमज्जन्ति।

संस्कृतभाषा अस्माकं समक्षम् एवंविधां जीवनपद्धतिम्

उपस्थापयति, यस्यां मूल्यानाम् उदात्त आधारो वर्तते। प्राचीनकालात् भारतीयसन्ततीः संस्कृतम् उच्चैः जीवनमूल्यं प्रति प्रेरयति स्म। संस्कृतस्य सन्देशोऽस्ति यत् – **वसुधैव कुटुम्बकम्**– सम्पूर्णः संसारः सम्पूर्णा मानवता च एकः परिवारः अस्तीति। आत्मवत्सर्वभूतेषु इति श्रुतिवचोऽनुसारेण जीवमात्रं प्रति समभावो भवेत्। अयमेव संस्कृतस्य दायः। एभिः सिद्धान्तैर्ज्ञायते यत् समाजस्य प्रतिष्ठापनं व्यक्तेरपेक्षया श्रेष्ठं विधातव्यम्, सर्वत्र आत्मनः प्रकाशः अवलोकनीयः। उपदेशोऽयं वेदादारभ्य इदानीं यावत् भूयो भूय आवर्तमानो दृश्यते। दशमः गुरुगोविन्दसिंहः प्रोक्तवान् यत्– **मानुस की जात सबै एकै करि मानबो**– सर्वे मानवाः समानाः, तेषु भेदः सर्वथा वर्जनीय इत्याशयः। साम्प्रतमिदमावश्यकं यत् अयं सन्देशः सम्पूर्णे जगतीतले प्रसारणीयः, येन भेदभावनया शोषणेन हिंसया च रहितस्य समाजस्य परिकल्पनं संसिद्ध्येत्।

संस्कृतस्य अस्माकं बोधः वैदग्ध्यं गौरवं च प्रति अस्मान् नयेत् येन वयं सर्वेषां समक्षं जगतः सर्वासां समस्यानां नैसर्गिकसमाधानाय समग्रदृष्टियुतम् उदाहरणम् उपस्थापयितुं शक्नुयाम।

---ooo---

संस्कृतं, विज्ञानं, वर्त्तमानविश्वं च

डॉ0 मुरलीमनोहर जोशी

महर्षिणा कविना विश्वामित्रेण साक्षात्कृतया ऋग्वेदस्य अनया प्रार्थनया स्वविषयं प्रारब्धुमिच्छामि--

प्राञ्च यज्ञं चकृम वर्धतां गीः
समिद्भिरग्निं नमसा दुवस्यन्।
दिवः सशासुर्विदथा कवीनां
गृत्साय चित् तवसे गातुमीषुः।।[1]

अस्यां प्रार्थनायां दिव्यवाण्याः ऋषेर्वाण्याः पावनोज्ज्वलायाः संस्कृतवाण्याश्च उत्सवो विद्यते, यदर्थं वयं अत्र समवेताः स्मः।

अस्माकं प्रधानमन्त्रिणः, ये च स्वयम् ऋषयः कवयश्च सन्ति तेषां व्याख्यानेन सभायज्ञे उद्दीप्ताया आकाङ्क्षायाः ज्योतिष्मत्या इच्छायाश्च वह्निनः प्रज्ज्वलितः। विश्वामित्रस्य दिव्यमन्त्रात् प्रेरणाम् आसाद्य वयं स्वराष्ट्रे संसारे च संस्कृतस्य विकासदिशि अग्रेसर्तुं शक्नुमः।

संस्कृतम् अस्मभ्यः कथम् इयदमूल्यम्? प्रथमं तावद् विलियमजोंसमहाभागस्य इमे शब्दाः स्मर्यन्ते - "ग्रीकतः अधिकं शुद्धं

लैटिनतः अधिकं समृद्धम्, उभाभ्याञ्च अधिकं परिष्कृतं संस्कृतम्" इति। अथवा श्रीमतः अरविन्दस्य मन्तव्यानुसारेण "संस्कृतं विचाराभिव्यक्तेः अपूर्वं परिष्कृतं समर्थं च साधनं, अस्मिन् स्पष्टता, सुबोधता, चरमसम्भावना शुद्धता चास्ति। इदं सर्वदैव सुघटितपदविन्यासं सूक्तिनिर्माणक्षमं सौन्दर्यसमृद्धिसम्पन्नम्, अपरञ्च प्राचीनकालादेवध्वनेः शैल्याश्च वैभवशालिपरम्पराणां वाहकं वरीवर्त्यते।" अथ सम्भवतस्ततोऽपि महत्त्वपूर्णं तथ्यम् इदम् अस्ति यत् संस्कृतमस्मभ्यम् अद्यापि अमूल्यमस्ति, यतो हि तत्र ज्ञानराशिर्विद्यते, यश्च साम्प्रतिके सङ्कटग्रस्ते काले सर्वथा प्रासङ्गिको वर्तते। यदि वयं तं संसाराय वितरेम, तदैवं याथार्थ्येण स्वदायित्वं अपि निर्वहेम। वर्तमानकाले यदा प्राच्याः प्रतीच्याश्च जनाः परस्परं समीपम् आयान्ति, तदा संसारः भारतात् बहु किमपि आकाङ्क्षते। विल ड्यूरेण्ट- महोदयस्तु भारतसम्बन्धिनः स्वचिन्तनस्य अवसाने इत्थं प्राकटयत् स्वाभिमतम्--"भारतम् अस्मभ्यं परिपक्वमस्तिष्कस्य, सहनशीलतायाः, सौम्यतायाः, अनाग्रहस्य, सन्तोषप्रवृत्तेः, जागरितस्य आत्मनः, शान्तेः जीवात्मसु परस्परम् एकतायाः प्रेम्णश्च दृष्टिं प्रयच्छति।" इति।[२]

(२)

संस्कृतग्रन्थेषु समुपलब्धं ज्ञानम्

संस्कृते तन्निबद्धग्रन्थेषु च प्राप्तं ज्ञानं सर्वतोमुखम्, जीवनस्य प्रत्येकं क्षेत्रैः सह सम्बद्धं व्यापकं विततं चास्ति। दार्शनिके आध्यात्मिके च क्षेत्रे ज्ञानपरिधिं परिच्छिद्य निस्सीम प्रति प्राप्नोति इदं चेतनायाः विभिन्नानि रूपाणि स्तरान् च समालोकयति।

संस्कृतसाहित्यस्य बृहत्तरो भागः मानवजीवनस्य कलायाश्च व्याख्यानं विदधाति। यद्यपि अत्र आध्यात्मिकचिन्तनस्य प्राधान्यमस्ति तथापि सहैव न केवलम् आचारशास्त्रस्य विधि- राजनीति- समाज- कलाकौशल- विज्ञानानाम् प्रत्युत कामकलायाः अपि विस्तृतं विश्लेषणं लभ्यते। संस्कृते अश्वानां गजानां च प्रजननस्य पालनस्य च व्यापकं वैज्ञानिकं विवेचनं विद्यते।

विज्ञानस्य क्षेत्रेऽपि इदं ज्ञानं आधुनिकयुगात् पूर्ववर्तिनः कस्यापि देशस्य ज्ञानपरम्परायाः तुलनायां अधिकं दूरगामि वर्तते। अत्र आयुर्विज्ञानस्य शल्यचिकित्सायाश्च पर्याप्तो विकास आसीत्। आयुर्वेदस्तु अद्यापि जीवति। तत्र च द्रुतगत्या अभिनवः शक्तिसञ्चारो भवति। गणित-ज्योतिष- रसायन- क्षेत्रेषु अनेन प्राच्य- प्रत्न- ज्ञानेन केषाञ्चित् विचाराणां गवेषणानां च पूर्वानुमानं कृतमासीत्, तानेव विचारान् गवेषणा वा यूरोपदेशीयाः परस्तात् विलम्बेन आविष्कृतवन्तः। "चला पृथिवी स्थिरा भाति-" इति समुद्गिरद्भिः भारतीयैः खगोलशास्त्रिभिः "पृथिवी गतिशीला विद्यते" - इति घोषणा गैलिलियो इति नामधेयस्य वैज्ञानिकस्य शताब्देभ्यः प्रागेव कृता। सायणेनापि भाष्ये प्रकाशस्य गतिविषये एकस्य सूत्रस्य चर्चा कृताऽस्ति सा चर्चा तदानीं लोकप्रिया आसीदिति प्रतीयते। तद्गताया मान्यतायाः याथार्थ्यम् आधुनिकं विज्ञानम् अपि स्वीकरोति। ततोऽपि प्राक् ऋग्वेदे भारद्वाजस्य एको मन्त्रो विद्यते, यस्मिन् भौतिकी गतिः प्रकाशेन कथं परिमातुं शक्यते इति प्रतिपादितम्। तथाहि-

आ भानुना पार्थिवानि जयांसि
महस्तोदस्य धृषता ततन्थ।[३]

प्राचीनभारतीयगणितेन बिन्दोरङ्कनपद्धतेः विकासः कृतः । सोऽयं विकासो विश्वस्मिन्नपि विश्वे वैज्ञानिकचेतनाया विकासाय नितरां महत्त्वपूर्ण आसीत्। यश्च ज्यामित्यां रेखागणिते वा 'पाइथागोरस-सिद्धान्त' इत्युच्यते, स वस्तुतः शुल्बसूत्रे निरूपितसिद्धान्तस्यैव विकासः अस्ति। आर्यभट्ट- ब्रह्मगुप्त- भास्करैः करणीचिह्नस्य, अनेकेषां बीजगणितीयप्रतीकानां, नकारात्मक-मात्रावधारणायाः, क्रमपरिवर्तनस्य, द्वित्वस्य, वर्गमूलप्राप्तेश्च नियमान् अन्विष्य वैज्ञानिकगणनासु अनितरसाधारणं योगदानं विहितम्। द्व्यंशपरिमाणं यावत् अनिश्चितसमीकरणानां गणना भारतीयवैज्ञानिकैः अष्टमशताब्द्यामेव कृता आसीत्, या च यूरौपीयेः सहस्रवर्षान्तरमपि अज्ञाता अतिष्ठत्। माधवेन न्यूटन-लेबनित्ज़-महोदयाभ्यां शताब्दत्रयात्प्रागेव 'कैलकुलस' इति पूर्वानुमितमासीत्। ज्ञानगवेषणा स्वयमेव गौरवं बिभर्ति, किन्तु ततोऽपि महत्त्वपूर्णो भवति तत्पद्धतेः

परिचयः, यस्य सहयोगेन संस्कृतविद्वांसः विभिन्नगवेषणानि आविष्कारान् च अधिगन्तुं सामर्थ्यं प्राप्तवन्तः।

अस्माभिः स्मरणीयं यत् संस्कृतं तत्सम्बद्धग्रन्थाश्च भीषणाक्रमणानां प्रहारं सोढवन्तः, सम्प्रति तेषां यः अंशोऽवशिष्यते, तस्यापि न पूर्णतः अस्माकं परिचयः यतो हि अधुनापि पाण्डुलिपीनां भूयसी संख्या अवशिष्यते यासां सम्पादनं अध्ययनं च अद्य यावत् नाभूत्। अस्मिन् सन्दर्भे राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु शोधकार्यस्य रूपरेखा अवश्यं निर्मातव्या, एतदस्माकममुम् आग्रहं समर्थये यत् संस्कृताध्ययनस्य ज्ञानस्य च प्रसारः समस्तेऽपि संसारे भवेदिति।

(३)

संस्कृते विज्ञानं चैतन्यं च

इदं सर्वथा महत्त्वपूर्णं यत् संसारे संस्कृते तत्सम्बद्धेषु ग्रन्थेषु निहितज्ञानस्य अन्वेषणाय परिचयाय च अपेक्षा सम्प्रति अतितराम् अनुभूयते। इदम् असन्दिग्धं यत् चिन्तनेन अधिगतानि सूक्ष्मातिसूक्ष्माणि रहस्यानि भारतीयदर्शनेषु स्वतः सिद्धानि। अद्यतनं भाषावैज्ञानिकं चिन्तनम् अपि पाणिनेः भर्तृहरेः सिद्धान्तस्य महत्त्वम् अङ्गीकरोति, अनुसन्धानस्य भागविशेषे एव वैज्ञानिकविचारः प्राचीनानां निष्कर्षाणां प्रतिनिधित्वं कुरुते। अभिनवैः मनोवैज्ञानिकानुसन्धानैः भारतीयमनोविज्ञानस्य पुष्टिर्भवति। यदि पाश्चात्त्या अस्यां दिशि अनुसन्धाने अग्रेसराः भवेयुः, तर्हि भारतीययोगस्य भारतीय-मनःशरीर-विज्ञानस्य च प्रतिपत्तीनां निष्कर्षाणां च समर्थनम् अवश्यमेव स्यादिति मे मतिः। ब्रह्माण्डविज्ञानक्षेत्रेऽपि भविष्यत्काले वैज्ञानिकाः स्वीकरिष्यन्ति पदार्थस्य ज्ञेयक्षेत्रातिरिक्तानां चेतनास्तराणाम् अस्तित्वम् इत्यहं मन्ये। यतो हि भारतीयचिन्तनपद्धतेः विद्यते कश्चनमूलाधारः। समकालिके अनुसन्धानक्षेत्रे तत्सम्पर्केण चेतनासम्बद्धस्य ज्ञानस्य माहात्म्यं वर्धिष्णु वर्तते।

देकार्तमहोदयस्य द्वैतवादः न्यूटनमहोदयस्य ब्रह्माण्डविषयकं यान्त्रिकं प्रारूपं च निरस्य साम्प्रतं भारतीयतत्त्वाबोधेन नेदीयसी जायते

आधुनिकी वैज्ञानिकचिन्तनपद्धतिः। अस्याः पद्धतेः साम्प्रतिकोऽयं विकासः चतुर्षु चरणेषु सम्पन्नः। तद्यथा-

प्रथमः- भारतीयः वैज्ञानिकः आचार्य-जगदीशचन्द्रबोसमहोदयः शतवर्षपूर्वमेव विज्ञान-संसारसमक्षं न केवलं जीवनचेतनयोः मध्ये अपितु जीवन-पदार्थयोः मध्येऽपि ऐक्यं प्रासाधयत्। एवं द्वैतवादो विखण्डितोऽभवत्।

द्वितीयः- डारविन्-महाशयः विकाससिद्धान्तस्य आधारभूमिं समस्थापयत्, यत्र जीवन-पदार्थयोः मस्तिष्कोत्पत्तिसम्बद्धाः प्रश्नाः समुद्भाविताः। यान्त्रिकव्याख्यामुखेन एतेषां समाधानं तावदशक्यम् आसीत्। बर्गसाँ-अलेक्ज़ेण्डर-ह्वाइटहेड-टेलार्टडी-चार्डिनप्रमुखाः चिन्तकाः विकास -नियन्त्रक-शक्तिस्वरूपेण चेतनां स्वीकृतवन्तः।

तृतीयः- प्रमातृयान्त्रिकी (क्वाण्टम् मेकेनिक्स) इत्यस्याः पद्धतेः विकासः हाईज़नबर्गमहोदयस्य अनिश्चिततासिद्धान्तः बेलमहाशयस्य प्रमेयश्च उपपारमाणविक-पदार्थक्रियास्वपि एकताचैतन्ययोः माहात्म्यं व्यवस्थापयामासुः।

चतुर्थश्च- परासंवेदिबोधः मस्तिष्कस्य उच्चतर-स्तर-सम्बन्धितानि अनुसन्धानानि च वैश्विकचेतनामहत्त्वम् अङ्गीकुर्वन्तचि।

एतादृशाः नैके निष्कर्षाः संस्कृतस्य महत्त्वदिशि एव सङ्केतयन्ति। यदि एतादृशी काचिद् भाषाऽस्ति, यत्र निरन्तरं चेतनासम्बन्धि चिन्तनं विधीयते, तर्हि सा भाषा संस्कृतभाषा एवास्ति। अनादिकालात् ऋषिभिः येषां वेदानां साक्षात्कारः कृतः, तेषामुपरि साम्प्रतं अनुभवस्य असङ्ख्यानि रूपाणि चेतनायाश्च अनन्तानि स्तराणि समाधृत्य विचार-विमर्श-जातं प्रवर्तते, तेषाम् अध्ययनं तदधिकृत्य शोधकार्यं च अनुसन्धातृभिः विधयेम्। इयं प्रक्रिया अन्तर-शास्त्रियानुसन्धानमाध्यमेन नूनं अग्रसरिष्यति। अस्यां प्रक्रियायां संस्कृतं संसारस्य सर्वोत्कृष्टभाषारूपेण समुन्नतं स्थानमधिकरिष्यति।

दर्शनक्षेत्रे साहित्यक्षेत्रे च एवंविधाः सङ्केताः पूर्वकालादेव प्राप्यन्ते। शॉपेनहावरमहोदयाः ऑल्डसहक्सलेमहोदयाः इमर्सन-महाशयाश्च उपनिषदां माहात्म्यं ज्ञातवन्तः, यत्र चेतनासम्बद्धं उन्नतं

चिन्तनं विद्यते। शॉपेनहावरमहोदयेनोक्तं यत् "सम्पूर्णेऽपि संसारे उपनिषद्भ्यः उदात्तं लाभकरञ्च चिन्तनं कुत्रापि नास्ति। इमाः उपनिषदः मम जीवने शान्त्यै मम निर्वाणकाले च शान्त्यै अलं स्युः।" इति।

इमर्सनमहाशयः स्वोपनिबद्धे ब्रह्मनामके काव्ये औपनिषदं सारं समभिव्यञ्जयन् उक्तवान्-- "अहमेव सन्देहः, सन्देहकर्ता च, अहमेव तद्गीतं यच्च ब्राह्मणैः गीयते।" इति।

सम्प्रति भूमण्डलीकरणं प्रति सरति संसारः। संसारस्य एकपरिवारत्वे परिकल्पना परिवर्धते। तत्र उपनिषदां सन्देशः अस्मभ्यं समधिकं महत्त्वं भजते। वयं उपनिषदां चेतनायाः तस्याः अवस्थायाः ध्वनिं शृणुमः येन सर्वविधम् असामञ्जस्यं दुःखं च समाप्यते।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषुचात्मानं ततो न विजुगुप्सते।।
यस्मिन् सर्वाणि भूतनि आत्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।

(४)

संस्कृतम् एका जीविता भाषा

इदं निर्भ्रान्तं वक्तुं शक्यते यत् संस्कृतस्य ऊर्ध्वोन्मुखो विकासः अवश्यम्भावी। अपेक्ष्यते केवलम् एकस्याः पद्धतेः कार्यक्रमस्य रूपरेखायाः निर्माणम्, येन वयं पुनरपि शीघ्रं सुनियोजितरूपेण प्राप्नुयाम स्वलक्ष्यम्। अस्माभिः प्रथमम् इदं ध्यातव्यम् यत् संस्कृतम् अनादिकालादेव भारतस्य अखिलभारतीयभाषापदम् अध्यास्ते। अस्य च विद्यते सार्वभौमः प्रभावः। एतत् कथनं सर्वथा अनुचितं भ्रामकं च यत् संस्कृतं मृतभाषा, इदं केवलं शास्त्रिया भाषा वेति। संस्कृतं निरन्तरं समेधते, विविधान् आघातान् सोढ्वाऽपि इदम् अस्माकं सुदीर्घम् अतीतं वर्तमानेन योजयति।

इदमपि ध्येयं यत् एकोनविंशतितमायाः शताब्द्याः ह्रासकालेऽपि महर्षिदयानन्दसरस्वती स्वान्दोलनं प्रारभमाणः जनसामान्यं संस्कृतेन समबोधयत्। यदि संस्कृतं जीवितभाषारूपेण प्रचलितं नाभविष्यत् तदा

एवं न स्यात्।

इदमपि उल्लेखनीयं यत् आधुनिकयुगस्य आरम्भिकवर्षेषु संस्कृते अप्पाशास्त्रि- वेलूकोण्डारामराय- राधामण्डलम्- नारायणशास्त्रि- महामहोपाध्यायलक्ष्मणसूरि- पण्डितमधुसूदनओझा-सदृशा लेखका अभूवन् येषु एकैकेन षष्टिसंख्यातः चत्वारिंशदधिकशतसंख्याकाः ग्रन्था विरचिताः।

आधुनिकयुगे अचिरेषु अपि वर्षेषु संस्कृते महत्त्वपूर्णं लेखनं सञ्जातम्। कृष्णमाचार्य- श्रीधरभास्करवर्णेकर- पण्डितबलदेवोपाध्याय- रामज्युपाध्याय- वाचस्पतिगैरोला- प्रभृतिभिः निबद्धाः संस्कृतसाहित्येतिहासग्रन्था अस्मिन् विषये प्रामाणभूताः तिष्ठन्ति।

डॉ० वेङ्कटरमणराघवन् इत्याख्यस्य विद्वत्कवेः लेखनम्, श्रीश्रीधरभास्करवर्णेकरमहोदयस्य संस्कृतवाङ्मयकोशः अन्यानि चाधुनिकसंस्कृतकाव्यानि संस्कृतस्य जीवनीं शक्तिं संस्कृतसाहित्यस्य नैरन्तर्यं च बोधयन्ति।

इदमपि ध्यातव्यं यत्साम्प्रतिकाः संस्कृतकवयः अधुनातनं विषयमालक्ष्य महाकाव्यानि व्यरीरचन्। संस्कृतनाटकेषु समकालिकेषु अधुनातनाभिरुचेः अभिव्यक्तिः समुपलभ्यते। इदमपि उल्लेख्यं यत् कैश्चित् प्रगीतकारैः महत्त्वपूर्णानि गीतानि रचितानि, तद्यथा- अप्पाशास्त्रिणः "पञ्जरबद्धः शुकः" उल्लेखमर्हति, यत्र इदानीन्तनसमस्या अभिव्यञ्जिताः। एतदतिरिक्तं वर्णेकरस्य "तीर्थभारतम्", "श्रीरामसङ्गीतिका", "श्रीकृष्णसङ्गीतिका"- इत्यादीनि काव्यानि अपि स्मरणीयानि। एतादृशकाव्येषु गीतगोविन्दस्य परम्परा नूतनसौन्दर्येण संवलिता विलसति विकसति च। पण्डितप्रवरस्य अम्बिकादत्तव्यासस्य शिवराजविजयः उपन्यासः एवंविधा अन्ये चोपन्यासाः आधुनिकसंस्कृतसाहित्यस्य नवीनां विकासदिशं निर्दिशन्ति।

इदमपि प्रशस्यं यत् अचिरगतेषु वर्षेषु संस्कृतकथासाहित्यस्य प्रभूतविकासोऽभूत्, तत्र साम्प्रतिकयुगस्य चेतना शैली च परिलक्ष्यते, एतदन्तराले आलोचनात्मक-निबन्धानामपि उन्नतं स्वरूपम् आयातम्।

साम्प्रतिके काले परःशतं संस्कृतपत्रिका- प्रकाश्यन्ते,

आकाशवाण्या दूरदर्शनेन च क्रियमाणेषु प्रसारणेषु संस्कृतं समृद्धं भवति। अहम् इदमपि वक्तुम् ईहे यत् संस्कृतविश्वविद्यालयानां स्थापनया राष्ट्रियसंस्कृतविद्यापीठैश्च संस्कृतविकासः प्रोत्साहितः, विभिन्न-विश्वविद्यालयानां संस्कृतविभागानां, भण्डारकर-प्राच्यविद्या-प्रतिष्ठानस्य डेक्कनमहाविद्यालयस्य च माध्यमेन संस्कृतविकासस्य अभिनवा गतिः दृश्यते। यदा प्रभृति संस्कृतं सङ्गणकयन्त्राय आदर्शभूतम् उपयुक्तं स्वीकृतं तदा प्रभृति विभिन्नस्थानेषु सङ्गणकमाध्यमेन अनुसन्धानसामग्रीणां सुरक्षणं ग्रहणं प्रयत्नेन समारब्धम्।

किन्तु नेदं पर्याप्तम्, इदं तु उपक्रमचिह्नम्। संस्कृतमहत्त्वं विभाव्य शिक्षायाः प्रतिस्तरं प्रतिरूपं संस्कृतशिक्षणप्रबन्धो भवेत्, संस्कृताय तृतीयवैकल्पिकभाषात्वे वरीयस्त्वं दीयेत, अतिरिक्तविषयरूपेणविद्यार्थिभ्यः, संस्कृताध्ययनसौविध्यं दीयेत। रुचिं ददानेभ्यः तथा पाठ्यक्रमो वैकल्पिकभाषारूपेण पञ्चवर्षात्मकः निर्मीयेत, येन छात्राणां संस्कृतभाषादाक्ष्यं सिद्ध्येत।

पुनश्च भारतीयसंस्कृतिसम्बद्धशिक्षापाठ्यक्रमेषु संस्कृतस्य अनिवार्यता स्यात्। येषां विषयाणां भारतीयसंस्कृत्या सह सम्बन्धोऽस्ति अथवा यत्र च भारतीयसंस्कृतेः अध्ययनस्य आवश्यकता अस्ति तत्र संस्कृतस्य शिक्षा अनिवार्यरूपेण भवेत्। संस्कृते निहितस्य ज्ञानस्य परिचयार्थम् अनया भाषया सह वैज्ञानिकान् दार्शनिकान् अनुसन्धाकर्तॄन् अन्यांश्च परिचाययितुम् आवश्यककार्यक्रमनिर्माणम् अपेक्ष्यते। ईदृशोऽप्येकः कार्यक्रमो विकासनीयः यत्र भारते प्राचीनकाले विकसितज्ञानस्य अधुनातनज्ञानेन समन्वयः स्यात्, येन अस्माकं आत्मविश्वासेन साहसेन च भविष्यत्प्रति अग्रेसृतिः स्यात्।

एकः अन्योऽप्येवं कार्यक्रमः विकसितः स्यात्, येन प्राच्यपाश्चात्त्ययोः विज्ञानाध्यात्मयोः समन्वयः सम्भवेत्, येन चेतनायोगौ प्रति समधिकं ध्यानं दीयेत।

सम्प्रति संस्कृताध्येतृभ्य इदम् अपेक्ष्यते यत् ते स्वचिन्तने लेखने च विचारशैल्योः स्तरेण उदारतायाः आधुनिकतायाः दीप्तेश्च समन्वयं कुर्युः। इयमपेक्षा तदैव पूर्येत यदा अस्माभिः स्वदेशे बौद्धिकेन नैतिकेन

सौन्दर्याभिव्यक्त्या इन्द्रियाग्राह्यानुभवैश्च संयोगः स्यात्। एतदर्थम् अस्माभिः वैदिकेभ्यः औपनिषदेभ्यः ऋषिभ्यः प्रेरणा ग्राह्या। वाल्मीकि-व्यास-कालिदासाः स्मरणीयाः। इलायाः सरस्वत्याश्च शक्तिरुद्बोध्या। तेभ्यः सर्वेभ्यः सृष्टिशीलतायाः चैतन्यं अर्जयित्वा भाविनं कालं प्रति चरणन्यासो विधेयः।

सङ्क्षेपतः अस्माकं विचारकैः दृश्ये दृष्टिः, श्रवणीये श्रुतिः विचारे बुद्धिः कथने वाणी, जीवने च स्फूर्तिः विधेया स्यात्, यथोक्तं केनोपनिषदि-

श्रोत्रस्य श्रोत्रं मनसो मनः वाचो ह वाचं,
प्राणस्य प्राणः चक्षुषः चक्षुः।

इति।

अहं सम्मेलनमिमं वैदिकमहर्षेः वामदेवस्य तां महतीं प्रार्थनां प्रति समर्पयामि यत्र एतादृश्या वाण्या आकाङ्क्षा अभिव्यज्यते या उद्दीप्तेच्छायाः अभिव्यक्तिं तेजस्विविवेकिपुरुषाणां प्रसन्नताञ्च संसाधयेत्।

एभिर्भव सुमना अग्ने अर्केरिमान्
स्पृश मन्मभिः शूर वाप्नान्।
उत ब्रह्माण्यङ्गिरो जुषस्व सं
ते शस्तिर्देववाता जरेत।।[5]

---ooo---

सन्दर्भाः-

१- ऋग्वेदे ३।१।२

२- द्रष्टव्यम्-- Will Durant-- Our Oriental Heritage, पृ० ६३३

३- ऋग्वेदे ६।६।६

४- ईशावास्योपनिषदि ६,७

५- ऋग्वेदे ४।३।१५

संस्कृतपरिषत्प्रकाशनानि

(सम्पर्कः- संस्कृतपरिषद्, संस्कृतविभागे, डा० हरीसिंहगौर-विश्वविद्यालयः,सागरम्- ४७० ००३ (म०प्र०)

१-संस्कृत कवियो के व्यक्तित्व का विकास (पुरस्कृतम्)- डॉ० राधावल्लभ त्रिपाठी-१९७६, मू० २५ रु०

२-वाल्मीकिविमर्शः- (पुरस्कृतम्) ,ले०-स एव ,१९७९, (अप्राप्यम्)

३-आदिकवि वाल्मीकि- ले० स एव ,१९८०, मू० २५ रु०

४-नाट्यमण्डपम्- ले० स एव, १९८०, (अप्राप्यम्)

५-भारतीयरङ्गसमुन्मेषः- ले०- स एव, १९८१, मू० १५रु०

६-कुन्दमाला- महाकविदिङ्नागस्य कृतेः हिन्दीभाषानुवादः, अनु०-स एव, १९८२, मू०- १० रु०

७-प्रबुद्धरौहिणेय- मुनिरामभद्रस्य कृतेः हिन्दीभाषानुवादः, अनु०-स एव, मू० ५रु०

८-मुकुन्दविलासम्- महाकविनीलकण्ठदीक्षितप्रणीतमहाकाव्यम्। -सं०-स एव। १९८०, (अप्राप्यम्)

९-न्यायसत्रम्- न्यायदर्शनमाश्रित्य परिसंवादः,-सं०-स एव। १९८४,मू० ६०रु०

१०-संस्कृत साहित्य को इस्लाम परम्परा का योगदान-- सं०--सं०-स एव।, १९८६,मू० ७० रु० (अप्राप्यम)

११-संस्कृत कविता की लोकधर्मी परम्परा-ले०- -सं०-स एव। १९८६, मू० ३०रु०

१२-सिद्धान्तसम्राट्- ज्योतिषग्रन्थ, सं०- मुरलीमनोहर चतुर्वेदी (पुरस्कृतम्)- १९८२, मू०१५रु०

१३- आधुनिकसंस्कृतमहाकाव्यानुशीलनम्- डॉ० रहसविहारी द्विवेदी, (अप्राप्यम्)

१४-रसार्णवसुधाकरः - सं० डॉ० रेवाप्रसाद द्विवेदी (अप्राप्यम्)

१५- आधुनिकसंस्कृतसाहित्यानुशीलनम्-सं०- डॉ० रामजीउपाध्यायः, १९६५, मू० ३० रु०

१६- सुसंहतभारतम्- संस्कृतनाटकम्, ले० पु० रामचन्द्रुडुः। मू० ३०रु०।

१७-श्रीहर्ष के रूपक - डॉ० गोकुलप्रसादत्रिपाठी, १९८१, मू० ४० रु०

१८-सिन्धुलिपिरहस्योद्घाटनम्- डॉ० फतहसिंहः। मू० १५रु०

१९-कर्णभार- भास, हिन्दीभाषानु० डॉ० इन्द्रमोहनसिंहः। मू० १०रु०

२०-अप्राप्य नाट्यशास्त्रीय ग्रन्थ- सं० डॉ० राधावल्लभः त्रिपाठी, मू० २०रु०

२१-भरटकद्वात्रिंशिका- प्राचीनकथासंग्रहः। हिन्दीभाषानुवादसहितः।, अनु०--सं०-स एव। मू०-१५रु०

२२-महाकवि भवभूति और उनका नाट्यलोक- सं० राधावल्लभः त्रिपाठी, भास्कराचार्यः त्रिपाठी च।मू० ५० रु०

२३-सन्धानम्- मौलिकसंस्कृतकाव्यसंग्रहः। प्रणेता- राधावल्लभः। १९८६, मू० ३०रु०।

२४-लहरीदशकम्- संस्कृतकाव्यसंग्रह- प्रणेता- -सं०-स एव।।१९९२ , मू० ३० रु०

२५-प्रख्या- संस्कृतकाव्यशृङ्खला।- सं० -सं०-स एव।, भागः-१, मू० ३०

२६-कालिदासपरिशीलन- सं०-सं०-स एव। , १९८७, मू० २०रु०

२७- कालिदास की समीक्षा परम्परा- ले० वही, १९८७, मू० ३०रु०

२८-भारतीय नाट्य स्वरूप और परम्परा- ले०-स एव। १९८७, मू०२५रु०

२९-शब्दादर्शः सं० डॉ० बाल शास्त्री, मू०१५रु०

३०-वेददीपिका- सं० डा० बाल शास्त्री,डॉ०रमाकान्तपांडेयश्च।मूल्य-३०रु०

३१-वाक्त्रयी- पालि-प्राकृतापभ्रंशभाषात्रयपाठसङ्कलनम्, हिन्दीव्याख्याटिप्पमादिसहितम्।सं०- डॉ० अच्युतानन्ददाशः, मू०२५रु०

३२-गीतधीवरम्- मौलिक गीतिकाव्य- प्रणेता- राधावल्लभ । १९९५। मू-३०रु०

नाट्यपरिषत्प्रकाशनानि

१- दमयन्ती- मौलिकहिन्दीनाटकम्।- मू० ४० रु०

२-भुवनदीप- मौलिकहिन्दीनाटकम्। मू० ४०रु०

३-नाट्यशास्त्र के बीज शब्द- भागः-१,२ मू० १५ रु० प्रत्येकम्

४-नाट्यशास्त्रसन्दर्भसूची- मू० १०रु०

पत्रिका

नाट्यम्- हिन्दीत्रैमासिकम्, ४६-अङ्काः प्रकाशिताः। आजीवनसदस्यता-५००रु०,वार्षिकशुल्कम्-३० रु०।

सागरिका समितिः पंजी. क्र. ८६७ NEWS PAPER'S
REG.NO. 13043/67

सागरिका

षट्त्रिंशद्वर्षेभ्यो निरन्तरं
प्रकाश्यमाना अन्ताराष्ट्रियख्यातिं
गता संस्कृतशोधपत्रिका

सागरिकासमितेः प्रकाशनम्

पूर्वं प्रकाशिता सागरिकाया विशेषाङ्काः

१.	भारतीयसंस्कृतिविशेषाङ्कः	-	नवमवर्षे
२.	विश्वसंस्कृतसम्मेलनविशेषाङ्कः	-	दशमवर्षे
३.	कालिदासविशेषाङ्कः	-	द्वादश-त्रयोदशवर्षयोः
४.	ज्योतिषविशेषाङ्कः	-	षोडशवर्षे
५.	नाट्यवेदविशेषाङ्कः	-	सप्तदशवर्षे
६.	रजतजयन्तीविशेषाङ्कः	-	पञ्चविंशवर्षे
७.	प्राचीनभारतीयसमाजदर्शनविशेषाङ्कः	-	ऊनत्रिंशवर्षे
८.	मनुस्मृतिविशेषाङ्कः	-	त्रयस्त्रिंशवर्षे
9.	आधुनिकसंस्कृतसाहित्यविशेषाङ्कः	-	पञ्चत्रिंशवर्षे
10.	संस्कृतगौरवविशेषाङ्कः	-	षट्त्रिंशवर्षे